कर्नाटकप्रशासनम्

# संस्कृतनन्दिनी-३

## दशमकक्ष्या

### प्रथमभाषा संस्कृतम्

**(Revised)**

### द्वितीया: भाग:

# 10

# SAMSKRITHA NANDINI-3

**TENTH STANDARD**

**FIRST LANGUAGE - SANSKRIT**

**PART-2**

@KTBS
NOT TO BE REPUBLISHED

**KARNATAKA TEXTBOOK SOCIETY (R)**

**6th Cross, Malleshwaram, Bengaluru-560 003.**

# पाठानुक्रमणिका

Z7S1D6


| क्र.सं. | पाठाः | पृष्ठसंख्या |
|---|---|---|
| १. | विवेकोदयः | १-७ |
| २. | मन्थरा निर्ममन्थ | ८-१३ |
| ३. | प्रयोगः | १४-२१ |
| ४. | कर्णभारम् | २२-३३ |
| ५. | भारतीयभावना | ३४-३९ |
| ६. | नाट्यांशाः | ४०-४५ |
| ७. | भीष्मोक्तयः | ४६-५३ |
| ८. | अलङ्काराः | ५४-५६ |
| ९. | छन्दः | ५७-५८ |
| १०. | पत्रलेखनम् | ५९-६२ |
| ११. | प्रबन्धः | ६३-६५ |
| १२. | सुभाषितानि ५-८ | ६६-७१ |


@KTBS
NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| | **पूरकपाठौ :** | |
| १३. | नगाधिराजः | ७२-७८ |
| १४. | भगवान् रमणमहर्षिः | ७६-७९ |
| | **परिशिष्टम्** | |
| १५. | अपठितगद्यभागः | ८०-८३ |
| १६. | अनुवादः | ८४-८५ |
| १७. | वाक्यरचनाकौशलम् | ८६-८९ |
| १८. | पदकोशः | ९०-९३ |
| १९. | प्रश्नपत्रिकास्वरूपम् | ९४ |
| २०. | मार्गदर्शिनी प्रश्नपत्रिका | ९५-९९ |
| २१. | पाठयोजना | १०० |


@KTBS
NOT TO BE REPUBLISHED

## अध्यापकेभ्यः सूचनाः

* शिक्षकैः जूनमासे आरम्भे सेतुपाठाः बोधनीयाः।
* पाठस्यान्ते अध्ययनं कुरुत, अवधेयशाः तथा क्रियाकलापः इति कश्चन भागः प्रदत्तः। अयं कक्ष्यायां पाठनीयः, किन्तु प्रश्नपत्रिकायां तद्विषये प्रश्नाः न प्रष्टव्याः।
* गद्यपाठान्तर्गताः श्लोकाः परीक्षायां श्लोकतात्पर्यं लिखत इत्यत्र प्रश्नरूपेण नैव देयाः।
* पाठान्ते विद्यमानाः विशेषांशा अपि प्रश्नरूपेण भवितुम् अर्हन्ति ।
* व्याकरणपाठान्तर्गताः अंशाः अपि प्रश्नरूपेण भवितुमर्हन्ति ।
* पूरकपाठेभ्यः अभ्यासे विद्यमानाः प्रश्नाः एव प्रश्नपत्रिकायां देयाः ।
* अनुवादपाठाः केवलं मार्गदर्शनार्थमेव। परीक्षासु सरलं, पञ्च-षट् वाक्ययुक्तं च परिच्छेदं दातुमर्हन्ति ।
* पाठ्यसम्बन्धिविषयाः एव क्रियाकलापस्य (अलींळींळीं) तथा परियोजनाकार्यस्य (झीक्षशलीं थींज्ञ) कृते देयाः।
* कक्ष्यायां यावत् साध्यं संस्कृतमाध्यमेनैव बोधनीयम्। छात्रेभ्यः संस्कृते रुचिम् उत्पादयितुं सम्भाषणं कर्तुं च अध्यापकैः प्रेरणा देया।

©KTBS
NOT TO BE REPUBLISHED

प्रथमः पाठः

# विवेकोदयः

E4B8E1

आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वृद्धत्वे भोज इति पुत्रः समजनि। स यदा पञ्चवार्षिकस्तदा पिता हि आत्मनो जरां ज्ञात्वा, अनुजं मुञ्जं महाबलम् आलोक्य पुत्रञ्च बालं वीक्ष्य विचारयामास - यद्यहं राज्यं सोदरम् अपहाय पुत्राय प्रयच्छामि बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा । पुत्रहानिः वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्वा तदुत्सङ्गे आत्मजं भोजं मुमोच ।

ततः क्रमाद्राजनि दिवङ्गते सम्प्राप्तराज्यसम्पत्तिः मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं दूरीकृत्य तत्पदेऽन्यं नियोजयामास। ततो गुरुभ्यः क्षितिपालपुत्रं वाचयति। ततो मुञ्जेन पृष्टो दैवज्ञो भोजस्य जन्मपत्रिकां निरूपयन्नाह।

**पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।**

**भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः ।।१।। इति**

तदाकर्ण्य राजा चातुर्यादपहसन्निव सुमुखोऽपि विच्छायवदनोऽभूत्। ततो राजा व्यचिन्तयत्- यदि राज्यलक्ष्मीः भोजकुमारं गमिष्यति तदाहं जीवन्नपि मृतः। तत्रोद्यमे किं दुस्साध्यम् ।

एवं चिन्तयन् सामन्तस्य वत्सराजस्य आकारणाय स्वमङ्गरक्षकं प्राहिणोत्। समागतो वत्सराजः रथादवतीर्य राजानमवलोक्य प्रणिपत्योपविष्टः। राजा च सौधं निर्जनं विधाय वत्सराजं प्राह - 'त्वया भोजः भुवनेश्वरीविपिने हन्तव्यः प्रथमयामे निशायाः। शिरश्चान्ते पुरमानेतव्यम्' इति।

अथ लम्बमाने दिवाकरे वत्सराजः रथं भुवनेश्वरीविपिनाभिमुखं विधाय भोजकुमारं गुरुकुलात् आनाययत्। बालं रथे निवेश्य जगामाशु महामायाभवनम्।

© KTBS NOT TO BE REPUBLISHED

तदासाद्य प्राह भोजं वत्सराजः - कुमार, ज्योतिश्शास्त्रविशारदेन केनचित् दैवज्ञेन तव राज्यप्राप्तवुदीरितायां राज्ञा भवद्वधो व्यादिष्टः इति ।

तदैव भोजः वटवृक्षस्य पत्रम् आदाय पुटीकृत्य जंङ्घा छुरिकया छित्वा तत्र पुटके रक्तम् आरोप्य तृणेन एकस्मिन्पत्रे कञ्चन श्लोकं लिखित्वा वत्सं प्राह - 'महाभाग! एतत्पत्रं नृपाय दातव्यम्। त्वमपि राजाज्ञां विधेहि' इति। ततो वैराग्यम् आपन्नो वत्सराजो भोजं 'क्षमस्व' इत्युक्त्वा प्रणम्य च रथे नगराद्बहिः घने तमसि गृहम् आगम्य भूमिगृहान्तरे तं निक्षिप्य ररक्ष। स्वयमेव कृत्रिमविद्याविद्भिः सकुण्डलं स्फुरद्वक्त्रं निमीलितनेत्रं भोजकुमारमस्तकं कारयित्वा तच्चादाय राजभवनं गत्वा राजानं नत्वा प्राह - 'श्रीमता यदादिष्टं तत्साधितम्' इत्युक्त्वा तत्पत्रम् अदात्। राजा पत्राक्षराणि वाचयति -

**मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः**
**सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः?**
**अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते**
**नैकेनापि समं गता वसुमती मुञ्ज! त्वया यास्यति ।।२।।**



राजा च तदर्थं ज्ञात्वा शय्यातः भूमौ पपात। ततश्च देवीकरकमलचालितचेलाञ्चलानिलेन ससंज्ञो भूत्वा द्वारपालान् आहूय 'पण्डितान् आनयत' इत्याह। ततः स्वाज्ञया समागतान् पण्डितान् नत्वा 'मया पुत्रो हतः, तस्य प्रायश्चित्तं

@KTBS NOT TO BE REPUBLISHED

वदध्वम्' इति वदन्तं ते तमूचुः - 'राजन्! सहसा वह्निमाविश' इति। ततः समेत्य बुद्धिसागरः प्राह - यथा त्वं राजाधमः तथैव अमात्याधमो वत्सराजः।

**राज्ञि धर्मिणि धर्मिष्ठाः पापे पापपरास्सदा ।**

**राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ।।३।।**

ततो रात्रावेव वह्निप्रवेशनं निश्चितवती राज्ञि सर्वे सामन्ताः पौराश्च मिलिताः। 'पुत्रं हत्वा पापभयात् भीतो नृपतिर्वह्निं प्रविशति' इति किंवदन्ती सर्वत्राजनि। ततो राजमरणवार्तां श्रुत्वा वत्सराजः सभागृहम् आगत्य बुद्धिसागरं नत्वा शनैः प्राह - 'तात, मया भोजो रक्षितः' इति । बुद्धिसागरश्च तस्य कर्णे किमपि अकथयत् ।

ततो मुहूर्तेन कोऽपि मूर्तिमान् चन्द्रचूड इव कापालिकः सभां समागतः। अमात्यः बुद्धिसागरः तं वीक्ष्य प्राह - योगीन्द्र ! कुत आगम्यते? कुत्र ते निवेशश्च ? इति । योगी प्राह- देव, अस्माकं नैको देशः। सर्पदष्टं शस्त्रभिन्नशिरस्कं, रोगग्रस्तं, च तत्क्षणादेव विगतव्याधिसञ्चयं कुर्मः इति। राजापि कुड्यान्तर्हित एव श्रुतसकलवृत्तान्तः सभामागतः कापालिकं दण्डवत्प्रणम्य 'योगीन्द्र! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्ष' इत्याह। अथ कापालिकोऽपि 'राजन् मा भैषीः। पुत्रस्ते न मरिष्यति । शिवप्रसादेन गृहम् एष्यति। परं श्मशानभूमौ बुद्धिसागरेण सह होमद्रव्याणि प्रेषय' इत्यवोचत्।

ततो रात्रौ गूढरूपेण भोजोऽपि तत्र नदीपुलिने नीतः। ''योगिना भोजो जीवितः'' इति प्रथा च समभूत्। ततो गजेन्द्रारूढो भोजः राजभवनम् अगात् । ततः सन्तुष्टो राजा निजसिंहासने तं निवेश्य तस्मै राज्यं ददौ। ततो भोजभूपालः देवप्रसादात् राज्यं पालयामास ।

*****

NOT TO BE REPUBLISHED ©KTBS

## शब्दार्थाः

**समजनि**=अजायत, **प्रणिपत्य**=नमस्कृत्य, **आकारयति**=आह्वयति, **निरूपयन्**= विवरणं कुर्वन्, **लम्बमाने दिवाकरे**= सायङ्काले, **आसाद्य**=प्राप्य, **आह**=वदति, **किंवदन्ती**=वार्ता, **कुड्यम्**=भित्तिः।

## विशेषांशः

✻ बहिः इति अव्यययोगे तत्सम्बद्धं पदं पञ्चमीविभक्त्यन्तं भवति ।

१) नगरात् बहिः उद्यानम् अस्ति ।

२) शालायाः बहिः क्रीडाङ्गणम् अस्ति ।

NOT TO BE REPUBLISHED © KTBS

## श्लोकतात्पर्यम्

१) पञ्चपञ्चाशत् वर्षाणि, सप्त मासाः, दिनत्रयम् एतावन्तं कालं भोजराजः गौडदेशसहितं विन्ध्यात् दक्षिणभूप्रदेशं (दक्षिणापथम्) पालयत्येव ।

२) कृतयुगस्यैव भूषणप्रायः मान्धाता भूपालः स्वर्गं गतः। महासागरस्यैव सेतुं विरचय्य लङ्काधीश्वरं दशकण्ठं रावणं यः जघान सः श्रीरामः इदानीं कुत्रास्ति? सोऽपि मृतः। युधिष्ठिरादयः अन्येऽपि श्रेष्ठनृपालाः दिवं प्राप्ताः। एतेषां महात्मनां मध्ये एकेन सहापि इयं वसुमती (भूः) न गता। महाराज, मुञ्ज! त्वया सह आगच्छेत् खलु...?

३) राजा यदा (धर्मी) धर्माचरणशीलः भवति तदा प्रजाः अपि धर्मिष्ठाः भवन्ति। राज्ञः एव पापे रतिः भवति चेत् प्रजाः अपि सदा पापपरायणाः भवन्ति। सर्वदा प्रजाः राजानम् अनुसरन्ति। अत एव उक्तम् - यथा राजा तथा प्रजाः इति ।

**कविकाव्यपरिचयः**

| | | | | | |
|---|---|---|---|---|---|
| कविः | - | बल्लाळसेनः | कालः | - | षोडशशतकम् |
| देशः | - | धारानगरम् | कृतिः | - | भोजप्रबन्धः |

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. भोजस्य पिता कः?

२. कापालिकः कथम् आसीत्?

३. भोजः कुत्र हन्तव्यः ?

४. वत्सराजः कदा भोजकुमारं गुरुकुलादानाययत्?

**२. रिक्तस्थानं पूरयत ।**

१. तदुत्सङ्गे........... मुमोच ।

२. वत्सराजस्य आकारणाय ............. प्राहिणोत् ।

३. भोजभूपालः ............... राज्यं पालयामास ।

**३. समानार्थकं पदं लिखत ।**

१. विपिनम् २. दशास्यः

३. दिवाकरः ४. क्षितिपालः

**४. अन्यलिङ्गपदं लिखत ।**

१. राजा २. योगी

३. पुत्रः ४. बालः

@KTBS NOT TO BE REPUBLISHED

**५. लिङ्ग-विभक्ति-वचनानि लिखत ।**

१. उद्यमे　　२. हानिः

३. तव　　४. राजन्

**६. लघूत्तरं लिखत ।**

१. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

२. बुद्धिसागरः मुञ्जं किं प्राह ?

**७. यथानिर्देशं लिखत ।**

१. सहसा वह्निमाविश ।

कः पाठः ? के ऊचुः ? कम् ऊचुः ?

२. मया भोजो रक्षितः ।

कः पाठः? कः वदति? कं वदति ?

**८. दशभिः वाक्यैः उत्तरं संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लिखत ।**

१. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

२. वत्सराजः भोजं कथं रक्षति ?

## अवधेयांशः

**भोजराजः -**

एषः भारतीयेतिहासे प्रसिद्धः राजा, कविः, कवीनां पोषकश्च आसीत् ।

कृतयः - १. चम्पूरामायणम्　२. सरस्वतीकण्ठाभरणम्　३. शृङ्गारप्रकाशः

NOT TO BE REPUBLISHED @KTBS

☞ **अध्ययनं कुरुत ।**

१. कादम्बरी(कन्नडानुवादः)-बन्नञ्जे गोविन्दाचार्यः
ईशावास्य प्रकाशनम् ।

२. दशकुमारचरितम्

३. विक्रमार्कचरितम्

४. हर्षचरितम्

## कोशः

अमात्यः = मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्ततः ।

पुलिनम् = तोयोत्थितं तु पुलिनं सैकतं सिकतामयम् ।

वक्त्रम् = वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।

जङ्घा = जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम् ।

## क्रियाकलापः

| | विग्रहवाक्यम् | समासः |
|---|---|---|
| अनलानिलौ | | |
| विद्याधनम् | | |
| राजहार्यम् | | |
| परोपकारः | | |
| दिनत्रयम् | | |

@KTBS NOT TO BE REPUBLISHED

K3X2Z7

## द्वितीयः पाठः

# मन्थरा निर्ममन्थ

पीठिका- दृश्यं श्रव्यमिति संस्कृतसाहित्यं द्विप्रकारकं दृश्यते । श्रव्यसाहित्यञ्च गद्यं पद्यं चम्पूश्चेतिश्च त्रिविधम् । पादरहितः पदसमुदायः गद्यम् । पादसहितः पदसमुदायः पद्यम् । गद्यपद्योभयात्मिका चम्पूः। गद्यपद्यमयी वाणी चम्पूः इत्यभियुक्तिः प्रसिद्धा एव । अत्र भोजकवेः चम्पूरामायणस्य कश्चन भागः स्वीकृतः ।

परिणतवयाः पङ्क्तिरथः (वृद्धो दशरथः) मन्त्रिभिः सह विचार्य पौरवृद्धान् आहूय उक्तवान् । 'जानन्ति एव भवन्तः यत् अस्माकं पूर्वजाः जनकल्याणमेव कामयमानाः प्रजाः पर्यपालयन्' इति । मयापि पूर्वजानां मनीषाम् अनुसरता एतावन्तं कालं प्रजाः परिपालिताः किल । सम्प्रति परिहर्तुमशक्या वृद्धावस्था मम शरीरे प्रकटिता । तस्मात् चिरकालधार्यमाणं पृथिवीपरिपालनभारं वत्से श्रीरामे निवेश्य विश्रामजन्यम् आनन्दम् उपभोक्तुम् अभिलषामि । श्रुत्वैतत् दशरथवचनं प्रजाजनाः हर्षनिर्भराः बभूवुः । ततश्च कथा अनुवर्ततेऽत्र ।

राजापि तेषां सम्पत्स्यमानमहोत्सवोत्सुकजनानां हर्षप्रकर्षेण द्विगुणीकृतमानन्दमन्तर्नियम्य सुमन्त्रप्रमुखान् मन्त्रिमुख्यान् एवमाचख्यौ ।

**अस्माननाश्रिततपोवनभूमिभागान्**
**उन्मुच्यमार्गपरिपालनजागरूकान्**
**अम्लानमौग्ध्यमचिरादवलम्ब्य रामम्**
**एवं विधः कथमुदेति जनानुरागः ।। १।।**

तेऽपि नियमितनिजमनोरथाय सविनयमेवं व्यजिज्ञपन् ।

**देवे स्थितेऽपि तनयं तव रामभद्रं**
**लोकः स्वयं भजतु नाम किमत्र चित्रम् ।**
**चन्द्रं विना यदुपलम्भनहेतुभूतम्**
**क्षीरोदमाश्रयति किं तृषितश्चकोरः ।।२।।**

NOT TO BE REPUBLISHED ©KTBS

ततः

**आहूय रामं विनयाभिराममाविः प्रमोदः प्रभुरेवमूचे ।**
**तवोत्तमाङ्गे मुकुटं विधातुमह्नाय तिष्ये दिवसे यतिष्ये।।३।।**

अथ दशरथमनोरथं कौसल्यायै निवेद्य स्वभवनमुपागतस्य रामस्य भगवान् वसिष्ठः सञ्जातकौतुकः कौतुकमङ्गलं निर्वर्तयामास ।

तस्मिन् अवसरे

**यामेवाहुर्निशिचरकुलोन्मूलने मूलहेतुं**
**यस्याश्चित्तं प्रकृतिकुटिलं गात्रमित्रं बभूव ।**
**अम्भोजिन्याः शिशिरसरसं कासरीवाच्चमम्भः**
**कैकेय्याः सा हृदयमदयं मन्थरा निर्ममन्थ ।।४।।**

सैषा मन्थराभिधानपिशाचिकावेशपरवशनिजाशया आत्मने वितीर्णं वराय दशरथाय वरद्वयं न्यवेदयत् ।

## शब्दार्थाः

आचख्यौ- उवाच, नियमितः -निर्धारितः, सञ्जातकौतुकः -समुत्पन्नहर्षः, कौतुकम् -रक्षासूत्रम्, (कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले) निर्वर्तयामास -चकार, वितीर्णम् -प्रदत्तम्, वराय- भर्त्रे ।

## अन्वयार्थः

१. अनाश्रिततपोवनभूमिभागान् = वानप्रस्थाश्रमम् अस्वीकृतवतः, मार्गपरिपालनजागरूकान् = नीतिशास्त्रोक्तविधिना प्रजापरिपालने सावधानान्, अस्मान्, उन्मुच्य = परित्यज्य, अम्लानमौग्धम् = बालकम्, रामम्, अवलम्ब्य = आश्रित्य, अचिरात् = एतावत् शीघ्रम्, एवं विधः = एतादृशः, जनानुरागः = लोकप्रीतिः, कथमुदेति = कथमुत्पद्यते ।

(अयं भावः - वृद्धे नृपे विद्यमाने अपि राजपुत्रे प्रजानाम् अनुरागस्य उदये कारणदद्वयं प्रसिद्धम्-

© KTBS NOT TO BE REPUBLISHED

१. वृद्धस्य नृपस्य स्वीकृतवानप्रस्थाश्रमत्त्वम् । २. प्रजासंरक्षणे असामर्थ्यम् । प्रकृते तु तादृशकारणाभावेऽपि बाले रामे प्रजानुरागः कथमुत्पन्नः इति आश्चर्यम्)

२. देवे = राज्ञि, स्थितेऽपि = प्रजापालनतत्परे सत्यपि, तव = भवतः. तनयम् = पुत्रम्, रामभद्रम् = श्रीरामचन्द्रम्, लोकः = जनः, स्वयं भजतु नाम = आत्मना एव नृपत्त्वेन वाञ्छतु नाम, अत्र किं चित्रम् =ईदृशे अभिलाषे किं आश्चर्यम् । तृषितः = पिपासितः, चकोरः = चन्द्रिकापायी पक्षिविशेषः, चन्द्रं विना = चन्द्रमुन्मुच्य, तदुपलम्भनहेतुभूतम् = चन्द्रस्य अवाप्तौ कारणभूतम्, क्षीरोदम् = क्षीरसागरम्, आश्रयति किम् ? = सेवते किम् ? (यथा चकोरः चन्द्रमेव आश्रयति नतु चन्द्रजनकं क्षीरसागरं तथा प्रजाजनोपि श्रीराममेव आश्रयति नतु तज्जनकं त्वाम् ।)

३. प्रभुः = राजा दशरथः, विनयाभिरामम् = विनयेन रमणीयम् ( विनयोपेतम्) रामम्, आहूय = आकार्य, आवि : प्रमोदः= समुदितहर्षः, एवं, ऊचे = उक्तवान्, अह्नाय = सपदि, तिष्ये दिवसे =(सर्वार्थसाधक) पुष्यनक्षत्रयुक्ते दिने, तव = भवतः, उत्तमाङ्गे = शिरसि, मुकुटम् = राजलक्षणं शिरोभूषणम्, (किरीटम्) विधातुम् = स्थापयितुम्, यतिष्ये = प्रयत्नं करिष्ये (पुष्ये तु सिध्यतिष्यौ इत्यमरः)

४. याम् एव = मन्थराम् एव, निशिचरकुलोन्मूलने = रावणादिराक्षसानाम् वंशविनाशे, मूलहेतुम् = आद्यकारणम्, आहुः = कथयन्ति(जनाः), यस्याः = मन्थरायाः, चित्तम् = मनः, प्रकृतिकुटिलम् = स्वभावेन वक्रम्, गात्रमित्रम् = शरीरसदृशम्, बभूव = आसीत्, सा मन्थरा = कैकेयी दासी, अम्भोजिन्याः = वाप्याः, शिशिरसरसम् = शीतलमधुरम्, अच्छम् = निर्मलम् अम्भः = जलम्, कासरी इव = वनमहिषी इव, कैकेय्याः हृदयम् = चित्तम्, अदयम् = निर्दयम्, निर्ममन्थ = पङ्किलम् अकरोत् । (यथा काचित् वनमहिषी सरः प्रविश्य तस्य निर्मलं जलं मलिनं करोति तथा मन्थरा कैकेय्याः स्निग्धं पवित्रं निर्मलं हृदयम् ईर्ष्यया निर्दयं पङ्किलम् अकरोत् इति भावः)

NOT TO BE REPUBLISHED ©KTBS

**कविकृतिपरिचयः-**

कविः- भोजराजः।

देशः- विदर्भः ।

कालः- क्रि. श. १०१८-१०६३(एकादशशतकम्)

कृतयः- चम्पूरामायणम्, सरस्वती कण्ठाभरणम्, श्रृङ्गारप्रकाशः इत्यादयः ।

## अभ्यासः

NOT TO BE REPUBLISHED ©KTBS

**१. एकवाक्येन उत्तरं लिखत ।**

१. चम्पूविषये प्रसिद्धा अभियुक्तिः का?

२. राजा कान् आचख्यौ?

३. तृषितः चकोरः कम् आश्रयति?

४. मन्थरा कस्याः हृदयं निर्ममन्थ?

**२. समानार्थकं पदं लिखत ।**

१. पङ्क्तिरथः २. तनयः ३. आनन्दः ४. मुकुटम्

**३. लकारपुरुषवचनानि लिखत ।**

१. उदेति २. यतिष्ये ३. निर्वर्तयामास ४. बभूव

**४. कृदन्तपदं चित्त्वा प्रत्ययस्य नाम लिखत ।**

१. मुकुटं विधातुं यतिष्ये।

२. नृपस्य मनोरथं निवेद्य जगाम ।

**५. लघूत्तरं लिखत ।**

१. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन्?

**६. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्लभाषया वा उत्तरं लिखत ।**

१. दशरथः पौरवृद्धान् आहूय किम् उक्तवान्?

## अवधेयांशः

**प्रसिद्धानि पञ्चचम्पूकाव्यानि -**

| | चम्पूकाव्यम् | | कविः |
|---|---|---|---|
| १. | चम्पूरामायणम् | - | भोजराजः |
| २. | चम्पूभारतम् | - | अनन्तभट्टः |
| ३. | विश्वगुणादर्शचम्पूः | - | वेङ्कटाध्वरिः |
| ४. | यशस्तिलकचम्पूः | - | सोमदेवः |
| ५. | नीलकण्ठविजयचम्पूः | - | नीलकण्ठदीक्षितः |

**चम्पूकाव्यप्रशंसा -**

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्ददातु कविमार्गजुषां सुखाय चम्पूप्रबन्धरचना रसना मदीया ।।

- चम्पूरामायणम् ।

*****

@KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

| | | |
|---|---|---|
| उपरि | विरुद्धार्थकपदं | |
| मङ्गलम् | | |
| सुरः | | |
| विषम् | | |
| जननम् | | |

✻ वर्णं योजयित्वा पूरयत ।

१.

| | | | |
|---|---|---|---|
| ज | | न्ना | |

२.

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | ल | क | | वि | | य | | म्पूः |

३.

| | | | | | |
|---|---|---|---|---|---|
| म | | रा | | ग | रं |

| प्राचीनविज्ञानिनः | | ग्रन्थनाम | |
|---|---|---|---|
| | वराहमिहिरः | | |
| | सुश्रुतः | | |
| | आर्यभटः | | |
| | चरकः | | |
| | भास्कराचार्यः | | |

@KTBS
NOT TO BE REPUBLISHED

# तृतीयः पाठः

## प्रयोगः

P6R5U6

**प्रयोगाः त्रिप्रकारकाः भवन्ति।**

**१. कर्तरिप्रयोगः २. कर्मणिप्रयोगः ३. भावेप्रयोगः**

| **प्रयोगाः** | **कर्तृपदम्** | **कर्मपदम्** | **क्रियापदम्** |
|---|---|---|---|
| कर्तरि | प्रथमाविभक्त्यन्तम् | द्वितीयाविभक्त्यन्तम् | परस्मैपदि, आत्मनेपदि |
| कर्मणि | तृतीयाविभक्त्यन्तम् | प्रथमाविभक्त्यन्तम् | आत्मनेपदि |
| भावे | तृतीयाविभक्त्यन्तम् | - | आत्मनेपदि |

**१. कर्तरिप्रयोगः**

* क्रियायाः कर्त्रा सह सम्बन्धः भवति ।
* कर्तृपदं प्रथमाविभक्त्यन्तं भवति। (त्रिषु वचनेषु)
* कर्मपदं द्वितीयाविभक्त्यन्तं भवति। (त्रिषु वचनेषु)
* क्रियापदं परस्मैपदे, आत्मनेपदे वा भवति ।
* क्रियापदं कर्तृपदानुगुणं पुरुषं वचनञ्च लभते।

**यथा - छात्रः कथां लिखति ।**

**२. कर्मणिप्रयोगः**

* क्रियायाः कर्मणा सह सम्बन्धः भवति ।
* कर्तृपदं तृतीयाविभक्त्यन्तं भवति ।
* कर्मपदं प्रथमाविभक्त्यन्तं भवति ।
* सर्वाण्यपि क्रियापदानि आत्मनेपदीनि एव भवन्ति ।

© KTBS NOT TO BE REPUBLISHED

* क्रियापदं कर्मपदानुगुणं पुरुषं वचनञ्च लभते ।
* कर्मणिप्रयोगे क्रियापदे (प्रायः धातोः परं) यकारः श्रूयते।

**यथा : छात्रेण कथा लिख्यते ।**

३. **भावेप्रयोगः**

* कर्तृपदं तृतीयाविभक्त्यन्तं भवति ।
* कर्मपदं न भवति ।
* सर्वाण्यपि क्रियापदानि आत्मनेपदीनि एव भवन्ति ।
* क्रियापदं प्रथम-पुरुष-एकवचने एव भवति ।
* भावेप्रयोगे क्रियापदे (प्रायः) यकारः श्रूयते।

**यथा - छात्रैः धाव्यते ।**

@KTBS
NOT TO BE REPUBLISHED

| **कर्तरिप्रयोगः** | **कर्मणिप्रयोगः** |
|---|---|
| १. बालकः पाठं पठति । | बालकेन पाठः पठ्यते । |
| २. बालकाः पाठं पठन्ति। | बालकैः पाठः पठ्यते । |
| ३. बालकः पाठान् पठति । | बालकेन पाठाः पठ्यन्ते । |
| ४. ते अङ्कान् लभन्ते । | तैः अङ्काः लभ्यन्ते । |
| ५. अहं जलं पिबामि । | मया जलं पीयते । |

| **कर्तरिप्रयोगः** | **भावेप्रयोगः** |
|---|---|
| १. बालकः धावति । | बालकेन धाव्यते । |
| २. बालिकाः हसन्ति | बालिकाभिः हस्यते । |
| ३. वृक्षः रोहति । | वृक्षेण रुह्यते । |

✻ त्रिषु अपि प्रयोगेषु क्त-क्तवतु-प्रत्ययानां व्यवस्था।

भूतकाले
- क्तवतु-प्रत्ययः
  - कर्तरि
    - सर्वेभ्यः धातुभ्यः
- क्त-प्रत्ययः
  - कर्मणि
    - सकर्मकेभ्यः
  - भावे
    - अकर्मकेभ्यः
  - कर्तरि
    - गत्यर्थकेभ्यः
    - अकर्मकेभ्यः

@KTBS
NOT TO BE REPUBLISHED

| **कर्तरि** | **कर्मणि** |
|---|---|
| १. बालकः पाठं पठितवान् | बालकेन पाठः पठितः । |
| २. बालिका फलं खादितवती । | बालिकया फलं खादितम् । |
| ३. अहं जलं पीतवान् । | मया जलं पीतम् । |
| ४. स्त्रियः आभरणानि धृतवत्यः । | स्त्रीभिः आभरणानि धृतानि । |
| ५. छात्रः ग्रामं गतवान् । | |
| छात्रः ग्रामं गतः । | छात्रेण ग्रामः गतः । |

| **कर्तरि** | **भावे** |
|---|---|
| १. छात्राः हसितवन्तः । | छात्रैः हसितम् । |
| २. बालिका धावितवती । | बालिकया धावितम् । |
| ३. सः तत्र स्थितः । | तेन तत्र स्थितम् । |

✻✻✻✻✻

## अभ्यासः

१. **मञ्जूषातः उचितं पदं उद्धृत्य रिक्तस्थानं पूरयत ।**

१. भक्तः ........ वन्दते । २. जनैः इतः ....... ।

३. छात्रैः वाक्यानि ......... । ४. तेन धनं ........... ।

(लभ्यते, बालिकया, देवं, पठ्यन्ते, गम्यते )

२. **प्रयोगपरिवर्तनं कुरुत ।**

१. अहं जलं पिबामि ।

२. त्वया किं खाद्यते ?

३. सः चित्रं पश्यति ।

४. अध्यापकेन प्रश्नः पृष्टः ।

५. जनाः हसितवन्तः ।

६. बालकाः क्रीडन्ति ।

७. वृक्षाः भवन्ति ।

८. कपयः फलानि खादन्ति ।

९. पित्रा कार्यालयः गम्यते ।

## अवधेयांशः

**✲ कर्तरि यः धातुः आत्मनेपदी भवति सः कर्मणि/भावे अपि आत्मनेपदी एव भवति। भेदस्तु 'य' कारमवलम्ब्य ज्ञातुं शक्यः ।**

©KTBS NOT TO BE REPUBLISHED

- चतुर्थगणीयानां कर्तरिरूपस्य, कर्मणि - भावे - रूपस्य च भेदः न स्फुटः।

मन्यते - मन्यते, युध्यते - युध्यते, खिद्यते - खिद्यते

**※ कर्मणि प्रयोगे प्रथमपुरुषयोगः आधिक्येन दृश्यते। किन्तु यत्र अस्मच्छब्दः, युष्मच्छब्दः वा कर्म भवति तत्र कर्मणि प्रयोगे उत्तम-मध्यमपुरुषयोः प्रयोगः भवति।**

| **कर्तरि** | **कर्मणि** |
|---|---|
| रामः मां पश्यति | रामेण अहं दृश्ये । |
| गुरुः त्वाम् आह्वयति | गुरुणा त्वम् आहूयसे । |

**※ केषाञ्चन धातूनां कर्मणि/भावे च रूपाणि विशिष्टानि भवन्ति ।**

**तद्यथा -**

| **धातुः** | **कर्तरि** | **कर्मणि** | **असाधु** |
|---|---|---|---|
| पा (पाने) | पिबति | पीयते | (पिब्यते) |
| घ्रा (गन्धोपादाने) | जिघ्रति | घ्रायते | (जिघ्र्यते) |
| ष्ठा (गतिनिवृत्तौ) | तिष्ठति | स्थीयते | (तिष्ठ्यते) |
| दाण् (दाने) | यच्छति | दीयते | (यच्छ्यते) |
| गम्लृ (गतौ) | गच्छति | गम्यते | (गच्छ्यते) |
| इषु (इच्छायाम्) | इच्छति | इष्यते | (इच्छ्यते) |
| दृशिर् (प्रेक्षणे) | पश्यति | दृश्यते | (पश्यते) |

**※ एतेषां कर्मणि/भावे च वकारस्य उकारप्राप्तिः भवति ।**

| **धातुः** | **कर्तरि** | **कर्मणि** |
|---|---|---|
| वद् | वदति | उद्यते |
| वच् | वक्ति | उच्यते |

NOT TO BE REPUBLISHED ©KTBS

| | | |
|---|---|---|
| वस् | वसति | उष्यते |
| वप् | वपति | उप्यते |
| वह् | वहति | उह्यते |
| स्वप् | स्वपिति | सुप्यते |

❋ **इकारान्ताः उकारान्ताः च दीर्घं प्राप्नुवन्ति ।**

जयति (जि) जीयते

चिनोति (चि) चीयते

शृणोति (श्रृ) श्रूयते

स्तौति (स्तु) स्तूयते

आश्रयति (आ+श्रि) आश्रीयते

❋ **ईकारान्ताः ऊकारान्ताः धातवः ।**

क्रीणाति - क्रीयते

नयति (नी) - नीयते

भवति (भू) - भूयते (अस्ति - भूयते)

सूते (सू) - सूयते

❋ **ऋकारान्ताः, ॠकारान्ताः, धातवः ।**

करोति (कृ) - क्रियते

धरति (धृ) - ध्रियते

हरति (हृ) - ह्रियते

वृणोति (वृ) - व्रियते

NOT TO BE REPUBLISHED @KTBS

तरति (तॄ) - तीर्यते

किरति (कॄ) - कीर्यते

✻ **अन्ये केचन धातवः**

कृष् - कर्षति - कृष्यते

वृषु - वर्षति - वृष्यते

सृज - सृजति - सृज्यते

**क्रियाकलापः**

✻ अधः प्रदत्तं चित्रं दृष्ट्वा निर्देशानुगुणं प्रयोगपरिवर्तनं कुरुत ।




@KTBS NOT TO BE REPUBLISHED




*****

@KTBS
NOT TO BE REPUBLISHED

K6A1F1

## चतुर्थः पाठः

# कर्णभारम्

*'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति पण्डितराजः जगन्नाथः अवदत्। तच्च काव्यं श्रव्यं दृश्यं चेति द्विविधम्। दृश्यकाव्यं तु अभिनयैः रूप्यते इति रूपकम्। प्रस्तुते रूपके कर्णस्यैव प्राधान्यम्। कर्णो हि दानेनैव जगति विख्यातः। तस्य दानशीलता अत्र सम्यक् निरूपिता वर्तते।*

**महाभारतयुद्धे द्रोणस्य मरणानन्तरं कर्णः कुरुसेनापतिः बभूव। अर्जुनेन सह योद्धुं कर्णशल्यौ युद्धभूमिं प्रविशतः।**

**पात्रपरिचयः**

**कर्णः** - अङ्गराजः, कौरवसेनापतिश्च ।

**शल्यः** - कर्णस्य सारथिः ।

**शक्रः** - ब्राह्मणरूपधारी इन्द्रः ।

(ततः प्रविशति कर्णः शल्यश्च)

**कर्णः** - शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः ।

**शल्यः** - बाढम् (चोदयति)

**कर्णः** - अहो नु खलु

**पूर्वं कुन्त्यां समुत्पन्नः राधेय इति विश्रुतः।**
**युधिष्ठिरादयस्ते मे यवीयांसस्तु पाण्डवाः ।।१।।**

भोः शल्यराज! श्रूयतां ममास्त्रस्य वृत्तान्तः ।

**शल्यः** - ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।

**कर्णः** - पूर्वमेवाहं जामदग्न्यस्य सकाशं गतवानस्मि ।

**शल्यः** - ततस्ततः ।

©KTBS NOT TO BE REPUBLISHED

**कर्णः** - ततः भगवन् अखिलान्यस्त्राण्युपशिक्षितुमिच्छामीत्युक्तवानस्मि।

**शल्यः** - ततस्ततः ।

**कर्णः** - ततो जामदग्न्येन ममाशीर्वचनं दत्त्वास पृष्टोऽस्मि। को भवान्? किमर्थमिहागत इति।

**शल्यः** - ततस्ततः ।

**कर्णः** - तत उक्तोऽहं भगवता ब्राह्मणेषूपदेशं करिष्यामि, न क्षत्रियाणामिति।

**शल्यः** - अस्ति खलु भगवतः क्षत्रियवंश्यैः पूर्ववैरम्। ततस्ततः ।

**कर्णः** - ततो नाहं क्षत्रिय इत्यस्त्रोपदेशं ग्रहीतुमारब्धं मया ।

**शल्यः** - ततस्ततः ।

**कर्णः** - ततः कतिपयकालातिक्रमे कदाचित् फलमूलसमित्कुशकुसुम ाहरणाय भगवता गुरुणा सहानुगतोऽस्मि।

**शल्यः** - ततस्ततः ।

**कर्णः** - ततः स गुरुर्वनभ्रमणपरिश्रमान्मदङ्के निद्रावशमुपगतः ।

**शल्यः** - ततस्ततः ।

**कर्णः** - ततः

**कृत्ते वज्रमुखेन नाम कृमिणा दैवान्ममोरुद्वये**
**निद्राच्छेदभयादसह्यत गुरोः धैर्यात्तदा वेदना।**
**उत्थाय क्षतजाप्लुतः स सहसा रोषानलोद्दीपितो**
**बुद्ध्वा मां च शशाप कालविफलान्यस्त्राणि ते सन्त्विति ।।२।।**

**शल्यः** - अहो कष्टमभिहितं तत्र भवता ।

**कर्णः** - शल्यराज! यत्रासावर्जुनः तत्रैव चोद्यतां मम रथः।

NOT TO BE REPUBLISHED @KTBS



(नेपथ्ये)

भोः कर्ण! महत्तरां भिक्षां याचे ।

**कर्णः** - (आकर्ण्य) अये वीर्यवान् शब्दः। आहूयतां स विप्रः। न न अहमेवाह्वयामि। भगवन् इत इतः।

(ततः प्रविशति ब्राह्मणरूपेण शक्रः)

**शक्रः** - भोः कर्ण! महत्तरां भिक्षां याचे।

**कर्णः** - दृढं प्रीतोऽस्मि, भगवन्।

**शक्रः** - (आत्मगतम्) किं नु खलु मया वक्तव्यम्, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये मूढ इति मां परिभवति।

NOT TO BE REPUBLISHED

तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि? भवतु दृष्टम् । (प्रकाशम्) भोः कर्ण! सूर्य इव, चन्द्र इव, हिमवानिव, सागर इव तिष्ठतु ते यशः।

**कर्णः** - भगवन्! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः-

**धर्मो हि यत्नैः पुरुषेण साध्यः**
**भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात्प्रजापालनमात्रबुद्ध्या**
**हतेषु देहेषु गुणा धरन्ते ।।३।।**

भगवन्, किमिच्छसि? किमहं ददानि।

**शक्र** :- महत्तरां भिक्षां याचे।

**कर्ण**:- महत्तरां भिक्षां भवते प्रदास्ये। श्रूयतां, विहितकनकशृङ्गं गोसहस्रं ददामि।

**शक्र**:- गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण! नेच्छामि।

**कर्ण**:- किं नेच्छति भवान्। इदमपि श्रूयताम्। बहुसहस्रं वाजिनां ते ददामि।

**शक्र**:- अश्व इति। मुहूर्तकमारोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्ण**:- किं नेच्छति भवान्? अन्यदपि श्रूयताम्, वारणानां वृन्दमेतद्ददामि।

**शक्र**:- गज इति। मुहूर्तकमारोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्ण**:- किं नेच्छति भवान्? अन्यदपि श्रूयताम्। अपर्याप्तं कनकं ददामि।

**शक्र**:- गृहीत्वा गच्छामि । (किञ्चिद्गत्वा) नेच्छामि कर्ण! नेच्छामि।

**कर्ण**:- तेन हि जित्वा पृथिवीं ददामि।

**शक्र**:- पृथिव्या किं करिष्यामि?

**कर्ण**:- तेन ह्यग्निष्टोमफलं ददामि।

**शक्र**:- अग्निष्टोमफलेन किं कार्यम्?

**कर्ण**:- तेन हि मच्छिरो ददामि।

**शक्र**:- अविहा अविहा ।

© KTBS NOT TO BE REPUBLISHED

**कर्णः** - न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्।

**अङ्गैः सहैव जनितं मम देहरक्षा**
**देवासुरैरपि न भेद्यमिदं सहास्त्रैः।**
**देयं तथापि कवचं सह कुण्डलाभ्याम्**
**प्रीत्या मया भगवते रुचितं यदि स्यात् ।।४।।**

**शक्रः** - (सहर्षम्) ददातु ददातु।

**कर्णः** - (आत्मगतम्) एष एवास्य कामः। किं नु खलु अनेककपटबुद्धेः कृष्णस्योपायः? सोऽपि भवतु। धिक् अयुक्तमनुशोचितुम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।

**शल्यः** - अङ्गराज, न दातव्यं न दातव्यम्।

**कर्णः** - शल्यराज! अलमलं वारयितुम्। पश्य-

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठति।।५।।**



© NCERT NOT TO BE REPUBLISHED

तस्मात् गृह्यताम्। (निकृत्य ददाति)

शक्रः - गृहीत्वा (आत्मगतम्) हन्त! गृहीते एते। पूर्वमेवार्जुनविजयार्थं सर्वदेवैर्यत्समर्थितं तदिदानीं मयानुष्ठितम्। तस्मात् अहमपि ऐरावतम् आरुह्य अर्जुनकर्णयोः द्वन्द्वयुद्धं पश्यामि। (निष्क्रान्तः)

कर्णः - शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः।

शल्यः - बाढम् ।

(भरतवाक्यम्)

**सर्वत्र सम्पदस्सन्तु नश्यन्तु विपदस्सदा ।**
**राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः ।।६।।**

(निष्क्रान्तौ)

© KTBS NOT TO BE REPUBLISHED

**विशेषांशाः**

१. स्पृह् - धातोः योगे ईप्सितार्थे चतुर्थी स्यात् ।

उदा - नार्यः पुष्पेभ्यः स्पृहयन्ति ।

बालकाः मधुरेभ्यः स्पृहयन्ति ।

पाणिनीयसूत्रम् - स्पृहेरीप्सितः।

**अन्वयार्थः**

१. **पूर्वम्** = प्रथमं, **कुन्त्याम्**=कुन्तीदेव्यां, **समुत्पन्नः**=जातः(अहम्), **राधेयः** =राधापुत्रः, **इति विश्रुतः**=इति प्रसिद्धः, **युधिष्ठिरादयः**=धर्मराजादयः ते **पाण्डवाः**, **तु** = ते पाण्डुतनयाः, **मे**=मम, **यवीयांसः**=अनुजाः (भवन्ति)

२. **दैवात्** = मम दुर्विधिना, **वज्रमुखेन नाम**=वज्रमुखः नाम, **कृमिणा**=जन्तुना, **मम=मे, ऊरुद्वये** = ऊरुद्वये, कृत्ते =छिन्ने सति, तदा=तस्मिन् काले, **गुरोः** = अचार्यस्य परशुरामस्य, **निद्राच्छेदभयात्** = निद्राभङ्गभिया, **धैर्यात्**=सधैर्यम्,वेदना= दुःखम्, **असह्यत** = मया सोढम्। **क्षतजाप्लुतः**=रुधिरेण आर्द्रीकृतः, **सः=गुरुः, सहसा** = सत्त्वरमेव, **उत्थाय** = जागरितः भूत्वा, **रोषानलोद्दीपितः** = क्रोधाग्निना सन्दीपितः, **मां च बुध्वा** = कर्णं, क्षत्रियः इति ज्ञात्वा, **ते अस्त्राणि** =तव मन्त्रास्त्राणि, **कालविफलानि** =समये फलरहितानि, **सन्तु इति**=भवन्तु इति, **शशाप**=शापं ददौ।

३. **पुरुषेण**=मानवेन, **यत्नैः**=उद्यमैः, **धर्मः**=धर्मः, **साध्यः हि**=प्राप्तुं योग्यः खलु?, **नृपश्रियः**=राज्ञः सम्पदः, **भुजङ्गजिह्वाचपला**=सर्पाणां रसना इव चञ्चलाः। **तस्मात्**= अतः कारणात्, **देहेषु हतेषु**= शरीरेषु नष्टेषु अपि, **प्रजापालनबुद्ध्या** = जनसंरक्षणधिया, **गुणाः**=सद्गुणाः, **धरन्ते** = तिष्ठन्ति ।

४. **अङ्गैः सह एव** = अवयवैः सममेव, **जनितम्** = उत्पन्नम्, **मम देहरक्षा** = कर्णस्य मम देहरक्षणं, **इदं** = कवचं, **अस्त्रैः सह** = आयुधैः सार्धं, **देवासुरैः अपि** =देवैः राक्षसैः अपि, **न भेद्यम्**=भेत्तुं न शक्यम्। **तथापि** = एवं स्थिते अपि, **भगवते** = देवाय, **यदि रुचितं स्यात्** = यदि इष्टं भवेत्, **कर्णेन कुण्डलाभ्यां सह** = तर्हि कुण्डलाभ्यां सह, **कवचम्** = रक्षाकवचं, **मया** = आत्मना, **प्रीत्या** = प्रीतिपूर्वकं, **देयम्** = दातुं योग्यम् ।

५. **कालपर्ययात्** = कालानुक्रमात्, **शिक्षा** = अधीतविद्या, **क्षयम्** = नाशम्, **गच्छति** = प्राप्नोति, **सुबद्धमूलाः** = सुदृढमूलाः, **पादपाः** = तरवः **अपि, निपतन्ति** = भूमौ पतन्ति। **जलस्थानगतम्** = जलाशयस्थम्, **जलम्** = वारि, **च शुष्यति** = अपि शुष्कतां याति, (परन्तु) **हुतम्** = अग्नौ प्रक्षिप्तम्, **च दत्तम्** = सत्पात्रे कृतं दानम्, **तथैव** = न प्रणष्टम्, **तिष्ठति**=भवति अथवा शाश्वतरूपेण तिष्ठति।

६. **सर्वत्र**=सर्वस्मिन् स्थाने, **सम्पदः** = भाग्यानि, **सन्तु** = भवन्तु, **सदा** = सर्वदा,

© KTBS NOT TO BE REPUBLISHED

**विपदः**= कष्टानि, **नश्यन्तु** = नाशं यान्तु, **राजगुणोपेतः**= दानदयादिराजगुणयुक्तः, **एकः**=अद्वितीयः, **नृपः**=राजा, **नः**=अस्माकं, **भूमिम्**= पृथिवीं, **प्रशास्तु**= पालयतु।



**कविकाव्यविचारः**

**कविः** - भासः ।

**देशः** - दक्षिणभारतम् ।

**कालः** - क्रि. पू. पञ्चमं शतकम् ।

**कृतयः** - स्वप्नवासवदत्तम्, कर्णभारम्, प्रतिमानाटकम्, दूतघटोत्कचम् इत्यादीनि चतुर्दशरूपकाणि।

## अभ्यासः

@KTBS NOT TO BE REPUBLISHED

**१. एकवाक्येन उत्तरं लिखत।**

१. 'राधेयः' इति विश्रुतः कः ?

२. पुरुषेण यत्नैः कः साध्यः ?

३. किं किं शाश्वतं तिष्ठति ?

४. कर्णस्य सारथिः कः ?

**२. रिक्तस्थानं पूरयत।**

१. भोः कर्ण! महत्तरां ........ याचे ।

२. कालपर्ययात् .......... क्षयं याति ।

३. हतेषु देहेषु .......... धरन्ते ।

४. शल्यराज! श्रूयतां ............ वृत्तान्तः ।

३. **संयोज्य लिखत।**

| अ | आ |
|---|---|
| १. कर्णसूतः | कर्णस्य गुरुः |
| २. जामदग्न्यः | चञ्चलाः |
| ३. नृपश्रियः | नश्यन्तु |
| ४. वज्रमुखः | शल्यराजः |
| ५. विपदः | कृमिः |

४. **रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत।**

१. शक्रः महत्तरां भिक्षां याचते ।

२. मम देहरक्षा अङ्गैः सह जनितम् ।

३. शल्यकर्णौ रथारोहणं कुरुतः ।

५. **समानार्थकपदं लिखत।**

१) शिरः २) भुजङ्गः

३) वृत्तान्तः ४) देहः

६. **विग्रहवाक्यं विलिख्य समासनाम लिखत।**

१) मच्छिरः २) यथाबलम्

३) देवासुराः ४) दीर्घायुः

७. **लघूत्तरं लिखत।**

१. जामदग्न्यः किमर्थं कर्णं शशाप ?

२. कर्णः शक्राय किं किं ददाति? तयोः वैशिष्ट्यं किम्?

NOT TO BE REPUBLISHED @KTBS

८. **यथानिर्देशम् उत्तरं लिखत ।**

१. ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।
क: पाठः? कः अवदत्? कस्य वृत्तान्तः ?

२. सागर इव तिष्ठतु ते यशः ।
कः पाठः? कः अवदत्? कस्य यशः ?

३. भगवन् किमिच्छसि? किमहं ददानि ?
कः पाठः? कः अवदत्? कम् अवदत् ?

९. **दशवाक्यैः उत्तरं संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लिखत।**

१. कर्णशक्रयोः सम्भाषणं विवृणुत ।

२. कर्णः स्वस्य अस्त्रवृत्तान्तं शल्यं प्रति कथम् अवर्णयत्?

© KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

## कोशः

**वाजी** - वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।

**वारणः** - मतङ्गजो गजो नागः कुञ्जरो वारणः करी ।

**भासविरचितानि चतुर्दशरूपकाणि**

**रामायणाधारितानि** - अभिषेकनाटकम्, प्रतिमानाटकम्, यज्ञफलम् ।

**महाभारताधारितानि** - मध्यमव्यायोगः, दूतवाक्यम्, दूतघटोत्कचम्,कर्णभारम्, ऊरुभङ्गम्, पञ्चरात्रम् ।

**बृहत्कथाधारितानि**-स्वप्नवासवदत्तम्,अविमारकम्,चारुदत्तम्, प्रतिज्ञायौगन्धरायणम्।

**भागवतपुराणाधारितम्** - बालचरितम् ।

-अध्ययनं कुरुत ।

१. उत्तररामचरितम् - भवभूतिः ।

२. अभिज्ञानशाकुन्तलम् (कन्नडानुवादः) - प्रो. के.टि.पाण्डुरङ्गि ।

३. कन्नडभासमहासम्पुटम् - एस्.वि.परमेश्वर भट्टः ।

## तद्धितान्ताः

तस्मै हिताः - तद्धिताः। अर्थात् प्रयोगार्थं हिताः इत्यर्थः। तद्धितप्रत्ययाः प्रातिपदिकानां विधीयन्ते। प्रातिपदिकानां विधीयमानेषु प्रत्ययेषु 'सुप्' भिन्नाः प्रत्ययाः सर्वे तद्धितप्रत्ययाः। तद्धितप्रत्ययान्तं पदं तद्धितान्तम्। तद्धितप्रत्ययाः बहवः सन्ति। अत्र केचन प्रदर्श्यन्ते ।

**अपत्यार्थकप्रत्ययाः (अण्, इञ्, एय)**

अपत्यं नाम सन्ततिः इत्यर्थः/पुत्रः पुत्री वा भवति। अपत्यम् इत्यर्थे प्रातिपदकात् एते प्रत्ययाः भवन्ति ।

**अण् (अ) प्रत्ययः**

१. पृथायाः अपत्यं पुमान् = पार्थः । २. गोतमस्य अपत्यं पुमान् = गौतमः।

**'इञ्' (इ) प्रत्ययः**

१. दशरथस्य अपत्यं पुमान् = दाशरथिः । २. मारुतस्य अपत्यं पुमान् = मारुतिः।

**'एय' प्रत्ययः**

१. शकुन्तलायाः अपत्यं पुमान्=शाकुन्तलेयः। २. मैथिल्याः अपत्यं पुमान्=मैथिलेयः।
३. राधायाः अपत्यं पुमान् = राधेयः ।

**भावार्थकप्रत्ययाः (त्व, तल्, ष्यञ्)** : भावो नाम प्रकृत्यर्थे प्रकारीभूतः धर्मः (जातिगुणादयः) ।

* **'त्व' प्रत्ययः** - सामान्यतः 'त्व' प्रत्ययान्तं पदं नपुंसकलिङ्गे एव भवति।

१. नरस्य भावः - नरत्वम् । २. कृपणस्य भावः - कृपणत्वम् ।

© KTBS NOT TO BE REPUBLISHED

✻ **'तल्' (ता) प्रत्ययः** - 'तल्' प्रत्ययान्तं पदं स्त्रीलिङ्गे एव भवति ।

१. मूर्खस्य भावः - मूर्खता ।    २. पूर्णस्य भावः - पूर्णता ।

✻ **'ष्यञ्' (य)**

१. अलसस्य भावः - आलस्यम्।    २. उदारस्य भावः - औदार्यम् ।

३. धीरस्य भावः = धैर्यम्    ४. सुखस्य भावः = सौख्यम् ।

## क्रियाकलापः




भारतः
कौन्तेयः
जाबालिः




पशुत्वमु
अर्हता
सोन्दर्यम्

✻✻✻✻✻

@KTBS NOT TO BE REPUBLISHED

पञ्चमः पाठः

# भारतीयभावना



*भारतम् अस्माकं जन्मभूमिः। भूमिरियम् अस्माभिः मातेति सगौरवमाद्रियते। पुण्यभूमिरियं विद्वद्वरेण्यैः कविभिः मधुरमञ्जुलपदपुञ्जैः वर्णिता अस्ति। देशस्यास्य माहात्म्यवर्णनद्वारा देशभक्तिः प्रकटिता च। 'भारतीयभावना' सर्वोत्कृष्टा, लोकहितकारिणी इति कविः अस्मिन् पद्ये अभिप्रैति।*

*अयं पद्यभागः डा।। नागराजन् महोदयस्य 'भारतवैभवम्' इति पद्यभागात् उद्धृतः।*

शैलश्रृङ्गवासिनीं कृपाकटाक्षशालिनीं
मङ्गलाङ्गशोभितां चराचरादिनायिकाम् ।
वल्लकीप्रभूतदिव्यभव्यगानतोषिणीं
राजराजपूजितां सदा नमामि मातरम् ।।१।।

NOT TO BE REPUBLISHED

चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी
भेदभावनाशिनी जनेषु चैक्यकारिणी।
दुःखशोकहारिणी भवाम्बुधेश्च तारिणी
भारतीयभावना विवृद्धिमेतु भारते ।।२।।

आत्मशक्तिवर्धिता विशालदृष्टिसंयुता
द्वेषभाववर्जिता निरन्तरं सुखप्रदा।
राष्ट्रसत्त्वधारिणी तमःप्रखण्डखण्डिनी
भारतीयभावना विवृद्धिमेतुभारते।।३।।

यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीयभावनेति वृद्धिमेतु भारते।।४।।

@KTBS
NOT TO BE REPUBLISHED

**अन्वयार्थः**

१. **शैलशृङ्गवासिनीम्** = पर्वतशिखरवासिनीम्, **कृपाकटाक्षशालिनीम्**= दयादृष्टियुक्ताम्, **मङ्गलाङ्गशोभिताम्** = कल्याणावयवैः राजिताम्, **चराचरादिनायिकाम्**= चराचरवस्तूनां स्वामिनीम्, **वल्लकीप्रभूतदिव्यभव्यगानतोषिणीम्** =वीणादिवाद्यनादयुक्त-प्रचुरदिव्य - भावयुक्तगानेन सन्तुष्टाम्, **राजराजपूजिताम्** = राजाधिराजैः पूजिताम्, **मातरम्**=भारताम्बिकाम्, **सदा**=सर्वदा नमामि।

२. **चित्तशान्तिदायिनी** = मनसः शमप्रदायिनी, **विरक्तिबुद्धिवर्धिनी** = वैराग्यभावप्रवर्धिनी, **भेदभावनाशिनी** = भिन्नभावमर्दिनी, च, **जनेषु** = लोकेषु, **ऐक्यकारिणी** = एकताजनयित्री, **दुःखशोकहारिणी**= दुःखस्य, शुचः, च संहारिणी, **च भवाम्बुधेः** = संसारसागरस्य, **तारिणी**= तारणकर्त्री, **भारतीयभावना**= वयं सर्वे भारतीयाः इति या भावना सा, **भारते**=अस्मद्देशे, **विवृद्धिम्**=वृद्धिम्, एतु= प्राप्नोतु।

३. **(इयं भारतीयभावना) आत्मशक्तिवर्धिता** = आत्मबलवर्धिनी, **विशालदृष्टिसंयुता** = औदार्यगुणान्विता, **द्वेषभाववर्जिता** = वैरभावविनिर्मुक्ता, **निरन्तरम्** = अनवरतम्, **सुखप्रदा**= सन्तोषदायिनी, **राष्ट्रसत्त्वधारिणी** = राष्ट्रियबलधारिणी, **तमःप्रखाण्डखण्डिनी** = विपुलान्धकारनाशिनी, **भारतीयभावना** = एतादृशगुणयुक्ता भारतीयभावना, **भारते** = अस्माकं देशे, **विवृद्धिमेतु** = वर्धताम् ।

४. **वयम्, समग्रभारते** = समस्तदेशे, **यत्र कुत्र वा स्थिताः** = वसामः, **भाषया** = विविधभारत्या, **धर्मतः च** = भिन्न, भिन्न धर्मानुयायिनः भूत्वा, **भिन्नमार्गम्** = भिन्नपथम् आश्रिताः स्म। **आदितः च मध्यतः, अन्ततः च** = भारतदेशे आदौ, मध्ये, अन्ते च **भारताः**= भारतीयाः वसामः, **भारते** = अस्मिन् देशे (सर्वत्र, सर्वदा), **भारतीयभावना** = वयं सर्वे भारतीयाः इति भावना, **वृद्धिमेतु** = अक्षयं भवतु

**कविपरिचयः**



**कविः** - डा।। के.एस्. नागराजन्

**देशः** - बेङ्गलूरुनगरम् (विल्सन्गार्डन्)

**कालः** - क्रि.श. विंशशतकम्

**कृतयः** - श्री सीतास्वयंवरम्, श्री शबरीविलासम् } काव्यद्वयम्

उन्मत्तकीचकम्, गुरुशापम् } नाटकद्वयम्

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. शैलशृङ्गवासिनी का ?

२. भारतमाता कैः पूजिता ?

३. भारतीयभावना निरन्तरं किं ददाति ?

४. भारतीयाः कथं भिन्नमार्गमाश्रिताः ?

२. **समूहेतरपदं चित्वा लिखत ।**

१. शैलः, पर्वतः, शृङ्गः, अचलः ।

२. तमः, प्रकाशः, तिमिरम्, अन्धकारः ।

३. अन्तः, आदिः, मध्यः, अन्यः ।

३. **विरुद्धार्थकं पदं लिखत ।**

१. चरः ३. प्रकाशः

२. द्वेषः ४. अन्तः

४. **लिङ्ग-विभक्ति-वचनानि लिखत ।**

१. भारते ३. नायिकाम्

२. वयम् ४. भाषायाम्

५. **लघूत्तरं लिखत ।**

१. कविः कीदृशीं मातरं नमामि इति वदति ?

## अवधेयांशः

**✻ डा।। के.एस्. नागराजन्महोदयाय प्रदत्ताः प्रशस्तयः**

(१) साहित्यालङ्कारः (२) काव्यरचनाचतुरः

(३) कविभूषणः (४) कर्णाटकराज्यप्रशस्तिः।

✻ एषः महोदयः बेङ्गलूरु नगरस्य न्याषनल् महाविद्यालयः, क्रैस्तम हाविद्यालयः, अर्.वि. महाविद्यालयः इत्यादि विद्यालयेषु प्राध्यापको भूत्वा सुरभारतीसेवाम् अकरोत्।

@KTBS NOT TO BE REPUBLISHED

## कोशः

तमः = अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।

शीघ्रम् = जवोऽथ शीघ्रं त्वरितं लघुक्षिप्रमरं द्रुतम्।

चित्तम् = चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।

कटाक्षः = .... कटाक्षोऽपाङ्गदर्शने

**-अध्ययनं कुरुत ।**

१. गीतसंस्कृतम् २. गेयसंस्कृतम् ३. शिशुगीतम् (संस्कृतभारती) ।

४. टुप् कविताः - एस्. जगन्नाथः (आदर्श संस्कृतमहाविद्यालयः, मल्लेश्वरम्)।

---

## क्रियाकलापः

**※ वाक्यानि रचयत ।**




@KTBS NOT TO BE REPUBLISHED

* **वर्णं योजयित्वा पूरयत ।**

१. भारतमातुः शिरसि एषः विराजते

| | | | |
|---|---|---|---|
| | मा | | यः |

२. अस्य त्रीणिलोचनानि सन्ति ।

| | | | | |
|---|---|---|---|---|
| | | ने | | |

३. वाराणस्याम् एषा नदी प्रवहति ।

| | | | | |
|---|---|---|---|---|
| ग | | | दी | |

४. भारतदेशस्य दक्षिणभागे स्थितं प्रसिद्धस्थलम् ।

| | | | | | |
|---|---|---|---|---|---|
| क | | कु | | री | |

* **अधोलिखितात् वर्णजालात् नदीनां पर्वतानां नामानि लिखत ।**

| | | | | |
|---|---|---|---|---|
| अ | र्बु | दः | | गं |
| रा | च | न्द्र | भा | गा |
| व | य | मु | ना | है |
| लिः | वि | न्ध्यः | मा | |
| नी | ला | द्रि | ह्या | स |
| श | वी | री | वे | का |

*****

@KTBS NOT TO BE REPUBLISHED

षष्ठः पाठः

T5T8C6

# नाट्यांशाः

''नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्'' इति महाकविः कालिदासः मालविकाग्निमित्रनाटके नाट्यस्य गरिमाणम् अवर्णयत्। नाट्यांशानां सर्वेषां प्रतिपादकं प्रसिद्धं शास्त्रं भरतमुनिविरचितं नाट्यशास्त्रम्। तस्मात् उद्धृते प्रस्तुतभागे रस-भाव-अभिनय-स्वर-आतोद्य-नायक-नायिका भेदानां परिचयः संक्षेपेण क्रियते।


अद्भुतम्


भयानकः


बीभत्सः


हास्यः


शान्तः


वीरः


शृङ्गारः


करुणः


रौद्रः

NOT TO BE REPUBLISHED

शृङ्गारहास्यकरुणाः रौद्रवीरभयानकाः।
बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः।।१।।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः।।२।।

आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः।।३।।

शारीरा वैणवाश्चैव सप्त षड्जादयः स्वराः।
निषादर्षभगान्धारमध्यपञ्चमधैवताः।।४।।

ततं चैवावनद्धञ्च घनं सुषिरमेव च ।
चतुर्विधं च विज्ञेयम् आतोद्यं लक्षणान्वितम्।।५।।

ततं तन्त्रीगतं ज्ञेयम् अवनद्धं तु पौष्करम्।
घनस्तु तालो विज्ञेयः सुषिरो वंश एव च।।६।।

धीरोद्धतो धीरललितो धीरोदात्तस्तथैव च।
धीरप्रशान्तश्चैवेति नायकाः नाटकाश्रयाः।।७

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा।।८।।

## अन्वयार्थः

१. शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तः इति नव रसाः नाटकादिरूपकेषु दृश्यन्ते ।

२. रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयम्, जुगुप्सा, विस्मयः, शमः इत्येते नव स्थायिभावाः अपि निरूपिताः।

३. आङ्गिकः = शरीरसम्बन्धी, वाचिकः = सम्भाषणरूपः, आहार्यः = आभरणं, वर्णविन्यासः, वस्त्रादयः, सात्विकः = सत्त्वगुणविशिष्टमनसा सम्पन्नः, धैर्य - विलास-गाम्भीर्यादिरूपः इति नाट्ये अभिनयाः चतुर्विधाः इति अवगन्तव्यम्।

@KTBS NOT TO BE REPUBLISHED

४. शारीराः = कण्ठेन उत्पन्नाः, वैणवाः = वेणुना उत्पन्नाः, निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः इति सप्तस्वराः च भवन्ति ।

५. आतोद्यम् इति वाद्यविशेषः ततम्, अवनद्धम्, घनम्, सुषिरम् इति चतुर्विधः प्रसिद्धः।

६. चतुर्विधेषु वाद्येषु तन्त्रीयुक्तं वाद्यं ततम्। मृदङ्गादिवाद्यविशेषाः अवनद्धम् । तालवाद्यं घनः। वंशनिर्मितः वेण्वादिः सुषिरम् इति कथ्यते । एतेषां चतुर्विधवाद्यानाम् आतोद्यमिति नाम ।

७. नाटकादिरूपकेषु धीरोद्धतः,धीरललितः, धीरोदात्तः, धीरप्रशान्तः चेति चतुर्विधाः नायकाः उक्ताः।

| | | |
|---|---|---|
| धीरोद्धतः | - | रावणः दुर्योधनादयः। |
| धीरललितः | - | श्रीकृष्णः, वत्सराजः । |
| धीरोदात्तः | - | श्रीरामः, अर्जुनः । |
| धीरप्रशान्तः | - | जीमूतवाहनः, धर्मराजः, बुद्धः। |

८. नाटकादिरूपकेषु दिव्या, नृपपत्नी, कुलस्त्री, गणिका इति चतुर्विधाः नायिकाः अपि निरूपिताः।

| | | |
|---|---|---|
| दिव्या | - | देवस्त्रियः, मेनका, ऊर्वशी । |
| नृपपत्नी | - | द्रौपदी, रत्नावली, विलासवती । |
| कुलस्त्री | - | सावित्री, अरुन्धती। |
| गणिका | - | परपुरुषासक्ता स्त्री, वसन्तसेना । |

**कविकाव्यविचारः**

| | | |
|---|---|---|
| **कवेः नाम** | - | भरतमुनिः |
| **देशः** | - | देशविषये किमपि न ज्ञायते । |
| **कालः** | - | क्रि.पू. द्वितीयशतकम् । |
| **कृतिः** | - | नाट्यशास्त्रम् |

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. नाट्ये कति रसाः स्मृताः ?

२. नाट्यस्य गरिमाणं कः अवर्णयत् ?

३. नाट्यशास्त्रस्य रचयिता कः ?

४. शान्तरसस्य स्थायिभावः कः ?

**२. चतुर्थं पदं लिखत ।**

१. हास्यम् - हासः :: करुणः ............... ।

२. क्रोधः - स्थायिभावः :: भयानकः ............... ।

३. अर्जुनः - धीरोदात्तः :: दुर्योधनः ............... ।

**३. लकारपुरुषवचनानि लिखत ।**

१. वक्ष्यामि २. क्रियते ३. अवर्णयत् ४. दृश्यते

**४. लघूत्तरं लिखत ।**

१. नाट्ये कति रसाः सन्ति ? ते के?

२. आतोद्यं कति विधम् ? तानि कानि ?

**५. दशवाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया आङ्ग्लभाषया वा लिखत।**

१. पाठ्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

NOT TO BE REPUBLISHED © KTBS

## अवधेयांशः

**धीरोद्धतः** - मायापरः प्रचण्डश्चपलोऽहंकारभूयिष्ठः ।
आत्मश्लाघनिरतो धीरैर्धीरोद्धतः कथितः।।

**धीरललितः** - निश्चिन्तो मृदुरनिशं कलापरो धीरललितःस्यात्।

**धीरोदात्तः** - अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः।।

**धीरप्रशान्तः** - सामान्यगुणैर्भूयान्द्विजादिको धीरशान्तः स्यात्।

| | **नवरसाः** | **नवभावाः** | **वर्णाः** | **दैवतानि** |
|---|---|---|---|---|
| १. | शृङ्गारः | रतिः | श्यामः | विष्णुः |
| २. | हास्यः | हासः | सितः | प्रमथः |
| ३. | करुणः | शोकः | कपोतः | यमः |
| ४. | रौद्रः | क्रोधः | रक्तः | रुद्रः |
| ५. | वीरः | उत्साहः | गौरः | महेन्द्रः |
| ६. | भयानकः | भयम् | कृष्णः | कालः |
| ७. | बीभत्सः | जुगुप्सा | नीलः | महाकालः |
| ८. | अद्भुतम् | विस्मयः | पीतः | ब्रह्मा |
| ९. | शान्तः | शमः | शुक्लः | नारायणः |

**अध्ययनं कुरुत ।**

नाट्यशास्त्रम् (कन्नडानुवादः) - श्रीरङ्ग ।

*****

NOT TO BE REPUBLISHED ©KTBS

## क्रियाकलापः

**आवरणस्थितशब्दस्य अर्थं ज्ञात्वा अक्षराणि सम्यक् योजयत ।**

१. वे सः द व्या (बादरायणः)

२. र वा अ णी म (देवभाषा)

३. लि ल गु का यः (औषधालयः)

४. न शू दा रः (कर्णस्य विशेषनाम)

५. र्णा ट रा क ज्य क म् (राज्यस्य नाम)

६. त्न प्र शी य लः (कार्यतत्परः)

७. ल वि ग्नि त्र मा का मि म् (नाटकम्)

**उपरितनकोष्टकात् अक्षरं चित्वा कवेः नाम लिखत ।**

*****

@KTBS NOT TO BE REPUBLISHED

सप्तमः पाठः

# भीष्मोक्तयः

R7G6B3

*भगवता व्यासमहर्षिणा ग्रथितः महान् ग्रन्थः 'महाभारतम्'। अत्र कौरवपाण्डवयोः कथा सुप्रसिद्धा। अयं पद्यभागः महाभारतस्य शान्तिपर्वणः अनुशासनपर्वणः च स्वीकृतः।*

*महाभारतयुद्धे पाण्डवाः जितवन्तः। पाण्डवेषु ज्येष्ठः युधिष्ठिरः पट्टाभिषिक्तः राजपदवीमलभत। ततः भगवतः श्रीकृष्णस्य वचनानुगुणं युधिष्ठिरः तेन सह भीष्मस्य समीपं गत्वा राजधर्मं बोधयितुं प्रार्थयत। ओघवती नदीतीरे शरतल्पे शयितः भीष्मः युधिष्ठिरं प्रति एवम् उपदिदेश।*

## (श्लोकतात्पर्यार्थं एतस्मात् प्रश्नाः न भवन्ति)

@KTBS NOT TO BE REPUBLISHED



**युधिष्ठिर उवाच**

पितामह महाप्राज्ञ सर्वशास्त्रविशारद।
दैवे पुरुषकारे च किंस्वित् श्रेष्ठतरं भवेत्।।१।।

**भीष्म उवाच**

यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम्।
तथा पुरुषकारेण विना दैवं न सिध्यति।।२।।
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा।
कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित्।।३।।

**युधिष्ठिर उवाच**

अतत्त्वज्ञस्य शास्त्राणां सततं संशयात्मनः।
अकृतव्यवसायस्य श्रेयो ब्रूहि पितामह ।।४।।

**भीष्म उवाच**

गुरुपूजा च सततं वृद्धानां पर्युपासनम्।
श्रवणं चैव शास्त्राणां कूटस्थं श्रेय उच्यते ।।५।।
मार्दवं सर्वभूतेषु व्यवहारेषु चार्जवम्।
वाक् चैव मधुरा प्रोक्ता श्रेय एतदसंशयम् ।।६।।
अहङ्कारस्य च त्यागः प्रमादस्य च निग्रहः।
सन्तोषश्चैकचर्या च कूटस्थं श्रेय उच्यते ।।७।।

**युधिष्ठिर उवाच**

कथं भवति पापात्मा कथं धर्मं करोति वा।
केन निर्वेदमादत्ते मोक्षं वा केन गच्छति।।८।।

**भीष्म उवाच**

लोभमोहाभिभूतस्य रागद्वेषान्वितस्य च।
न धर्मे जायते बुद्धिः व्याजाद्धर्मं करोति च।।९।।
यथा कुशलधर्मा स कुशलं प्रतिपद्यते ।

© KTBS NOT TO BE REPUBLISHED

कुशलेनैव धर्मेण गतिमिष्टां प्रपद्यते ।।१०।।

अतृप्यमाणे निर्वेदमादत्ते ज्ञानचक्षुषा।
प्रज्ञाचक्षुर्यदा कामे रसे गन्धे न रज्यते ।।११।।

शनैर्निर्वेदमादत्ते पापं कर्म जहाति च।
धर्मात्मा चैव भवति मोक्षं च लभते परम्।।१२।।

*****

## विशेषांशाः

१. 'विना' इति अव्यययोगे तत्सम्बद्धं पदं द्वितीया/तृतीया/पञ्चमी विभक्त्यन्तं भवति । उदा : बीजं/बीजेन/बीजात् विना उप्तं क्षेत्रं निष्फलं भवति ।

## अन्वयार्थः

१. **सर्वशास्त्रविशारद** = भोः, धर्मनीत्यादिसर्वेषु शास्त्रेषु पारङ्गत! **महाप्राज्ञ** = महाज्ञानिन्! **पितामह** = भीष्मपितामह! **दैवे** = विधौ (भागधेये) च, **पुरुषकारे** = पुरुषप्रयत्ने, (अनयोर्मध्ये) **किंस्वित्** = कतरं, **श्रेष्ठतरम्** = अधिकं श्रेष्ठम्, **भवेत्** = भूयात् । (दिष्टपौरुषयोः कः श्रेष्ठतरः इति प्रश्नः)

२. **यथा** = येन प्रकारेण, **क्षेत्रं विना** = कर्षणजलमिश्रणादिभिः संस्कृतां भूमिं विना, **उप्तं बीजं**=स्थापितं बीजम्, **निष्फलं भवति**=अफलं भवति। (फलदायकं न भवति) **तथा** = तेन प्रकारेण, **दैवं विना** = सौभाग्यं विना, **पुरुषकारेण** = केवलेन मानवप्रयत्नेन, **न सिध्यति** =(कार्यं) न फलति। (पुरुषप्रयत्नः, **अनुकूलकरः** विधिः च द्वावपि आवश्यकौ इत्यर्थः।)

३. **शुभेन कर्मणा**=पुण्येन कार्येण, **सौख्यम्**=हर्षभावम्, **पापेन कर्मणा** = अशुभेन कार्येण, **दुःखम्** = अनिष्टम्, (प्राप्नुवन्ति)। **सर्वत्र** = सर्वेषु क्षेत्रेषु, कृतम् = आचरितम्, कार्यं, **फलति** = फलं ददाति। **क्वचित्** = कुत्रापि, **अकृतम्** = अनाचरितं कर्म, **न भुज्यते** = न अनुभूयते। (फलं न ददाति।) (भोक्ता स्वानुष्ठितस्यैव कर्मणः फलं भुङ्क्ते न तु अननुष्ठितस्य।)

©KTBS NOT TO BE REPUBLISHED

४. **पितामह** = भोः भीष्मपितामह! **शास्त्राणाम्** = शास्त्रग्रन्थेषु प्रतिपादितम्, **अतत्त्वज्ञस्य** = तत्त्वम् अजानतः (पुरुषस्य), **सततं** = सदा (सर्वेषु विषयेषु) **संशयात्मनः** = शङ्कावतः, **अकृतव्यवसायस्य** = (पुरुषार्थप्राप्तये) अकृतप्रयत्नस्य, (पुरुषस्य) **श्रेयः** = पुण्यम्, कथं भवेत्?, **ब्रूहि** = कथय।

५. (युधिष्ठिर)**सततम्**=सर्वदा, **गुरुपूजा**= गुरुजनसपर्या, च, **वृद्धानाम्**=ज्येष्ठानाम्, **पर्युपासनम्**= सेवाकरणम्, **चैव** = अपि, **शास्त्राणाम्** =तत्त्वोपदेशग्रन्थानाम्, **श्रवणम्** = आकर्णनम् (एतानि) **कूटस्थम्** = शाश्वतम्, **श्रेयः** उच्यते = पुण्यं (सुखदायकं) कथ्यते ।

६. **सर्वभूतेषु** = सर्वप्राणिषु, **मार्दवम्** = मृदुस्वभावेन वर्तनम्, च, **व्यवहारेषु** = नित्यकार्यकलापेषु, **आर्जवम्** = सरलता, **चैव** = अपि च, **प्रोक्ता मधुरा वाक्** = उक्तं हितवचनम्, **एतत्** = इदम् (एतानि सर्वाणि) **श्रेयः** = पुण्यजनकम्, (चित्तशुद्धिसाधनानि) (भवति) । **असंशयम्** = अत्र शङ्का नास्ति ।

७.**च, अहङ्कारस्य** = गर्वस्य, **त्यागः**, च, **प्रमादस्य**= दोषस्य (अनवधानतायाः), **निग्रहः**= नियन्त्रणम्, **चैव**= अपि च, **सन्तोषः**= प्रमोदः, च, **एकचर्या**= एकान्ते वासः, (एतानि) **कूटस्थम्**=शाश्वतम्, **श्रेयः**=यशः (पुण्यजनकानि) **उच्यते**= कथ्यते।

८. **मानवः, पापात्मा** = दुराचारी, **कथं भवति** = केन प्रकारेण भवति, वा = च, **धर्मं** = सत्कर्म, **कथं करोति** = केन प्रकारेण आचरति । **निर्वेदम्** =वैराग्यम्, केन = कथम्, आदत्ते = प्राप्नोति। **वा** = च, **मोक्षम्** = कैवल्यम्, **केन** = कथम्, **गच्छति** = अधिगच्छति।

९. **लोभमोहाभिभूतस्य** = आशामोहादिदोषाधीनस्य, च, **रागद्वेषान्वितस्य** = अनुराग असूयादिभिः युक्तस्य, (मानवस्य) **धर्मे** = सत्कर्मणि (सदाचारविषये) **बुद्धिः** = मनीषा (इच्छा), **न जायते** = न उत्पद्यते। **च,** (एतादृशः नरः) **धर्मम्** = सत्कर्म, **व्याजात्** = अपदेशात् (कपटात्), **करोति** = आचरति। (एवं कामक्रोधादिभिः आकृष्टः मनुजः पापात्मा भवति।)

NOT TO BE REPUBLISHED ©KTBS

१०.**यथा** = येन प्रकारेण, **सः** = असौ मानवः, **कुशलधर्मा** = सत्कर्माणि एव आचरति, (तथा) **कुशलम्** = शुभफलम्, **प्रतिपद्यते** = प्राप्नोति। **सः, कुशलेनैव** = क्षेमकरेणैव, **धर्मेण** = सत्कर्माचरणेन, **इष्टाम्** = ईप्सितां, **गतिम्** = सद्गतिम्, **प्रपद्यते** = अवाप्नोति ।

११. (धर्मात्मा) **अतृप्यमाणः** = (शुभाशुभफलेषु) अतृप्तः भूत्वा, **ज्ञानचक्षुषा** = ज्ञानरूपेण नेत्रेण, **निर्वेदम्** = **वैराग्यम्, आदत्ते** = प्राप्नोति। ततः सः, **प्रज्ञाचक्षुः** = प्राज्ञः भवति, ततः सः, **कामे** = इच्छापूरणे, **रसे** = जिह्वाचापल्ये, **गन्धे** = सुगन्धद्रव्यादिविषये, **न रज्यते** = अनुरक्तः न भवति। (**प्रज्ञाचक्षुः** = प्रज्ञानं = ज्ञानसाधनं शास्त्रं, चक्षुः इव यस्य सः)

१२. (साधकः नरः) **शनैः** = क्रमशः, **निर्वेदम्** = वैराग्यम्, आदत्ते = प्रतिपद्यते। च, **पापं कर्म** = दुष्टं कार्यम्, **जहाति** = त्यजति। **चैव** = अपि च, सः, **धर्मात्मा** = सत्कर्मानुष्ठाननिरतः भवति। च, **परम्** = श्रेष्ठम्, **मोक्षम्** = मुक्तिम्, लभते = अधिगच्छति। (मुक्तो भवति)



**कविपरिचयः**

| | | |
|---|---|---|
| **कविः** | - | वेदव्यासः । |
| **मातापितरौ** | - | सत्यवती, पराशरः च । |
| **देशः** | - | यमुनानदीद्वीपः । |
| **कालः** | - | द्वापरयुगम्। |
| कृतयः | - | महाभारतम्, ब्रह्मसूत्राणि, अष्टादशपुराणानि । |

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. पाण्डवेषु कः राजपदवीम् अलभत ?

२. उप्तं बीजं केन विना निष्फलं भवति ?

©KTBS NOT TO BE REPUBLISHED

३. कीदृशेन कर्मणा सौख्यं भवति ?

४. कीदृशस्य पुरुषस्य धर्मे बुद्धिः न जायते ?

५. मानवः कथं निर्वेदम् आदत्ते ?

**२. रिक्तस्थानं पूरयत ।**

१. दुःखं .............. कर्मणा भवति ।

२. मानवः .............. धर्मेण गतिमिष्टां प्रपद्यते ।

३. युधिष्ठिरः राजधर्मं बोधयितुं .............. प्रार्थयत ।

४. निर्वेदमापन्नः धर्मात्मा .............. च जहाति ।

**३. विरुद्धार्थकं पदं लिखत ।**

१. सफलम् २. संशयः ३. मार्दवम्

**४. लिङ्गविभक्तिवचनानि लिखत ।**

१. कर्मणा २. श्रेयः ३. चक्षुषा

**५. वाक्यदोषं परिहरत ।**

१. पुरुषकारस्य विना दैवं न सिध्यति ।

२. धर्मेण इष्टं गतिं प्रपद्यते ।

**६. लघूत्तरं लिखत ।**

१. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

२. मानवः निर्वेदं कथम् आप्नोति? ततः सः किं कुरुते ?

**७. यथानिर्देशं लिखत ।**

१. किंस्वित् श्रेष्ठतरं भवेत् ?

कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

©KTBS NOT TO BE REPUBLISHED

२. रसे गन्धे न रज्यते ।

कः पाठः? कः अवदत्? कः न रज्यते ?

८. **दशभिः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा लिखत।**

१. भीष्मयुधिष्ठिरयोः संवादं पद्यानुगुणं संगृह्य लिखत ।

## अवधेयांशः

## कोशः

दैवम् - दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।

श्रेयः - स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।

मोक्षः - मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्। मोक्षोऽपवर्गः..........।

* **महाभारतसम्बद्धानि प्रशंसावचनानि।**

- भारतं पञ्चमो वेदः ।
- शतसाहस्री संहिता ।
- महत्त्वात् भारवत्त्वात् महाभारतमुच्यते ।
- जयो नामेतिहासोऽयम्।
- यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।

## क्रियापदम्

१. ब्रूहि - लोट् लकारः, परस्मैपदी ।

ब्रूञ् - (व्यक्तायां वाचि) - कथयति। अदादिगणः, उभयपदी ।

NOT TO BE REPUBLISHED
@KTBS

| | | |
|---|---|---|
| ब्रवीतु | ब्रूताम् | ब्रुवन्तु |
| ब्रूहि | ब्रूतम् | ब्रूत |
| ब्रवाणि | ब्रवाव | ब्रवाम |

२. आदत्ते - 'आ' उपसर्गपूर्वकः। लट्लकारः, आत्मनेपदी ।

डुदाञ् (दा) - दाने - यच्छति। जुहोत्यादिगणः, उभयपदी ।

| | | |
|---|---|---|
| दत्ते | ददाते | ददते |
| दत्से | ददाथे | दद्ध्वे |
| ददे | दद्वहे | दद्महे |

## क्रियाकलापः

-विनायोगे द्वितीया, तृतीया, पञ्चमी च विभक्तिः भवति इति वाक्यद्वारा दर्शयत।

विद्या
धन
वायु
जल
पुस्तक
तद्

— विना —

प्राणिनः न जीवन्ति ।
मीनः न जीवति ।
नरः न शोभते ।
पठनं नास्ति ।
तृणमपि न चलति ।
जीवनं न चलति ।

*****

@KTBS NOT TO BE REPUBLISHED

G1Z9Y3

## अष्टमः पाठः

# अलङ्कारः

*'काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते' इति काव्यादर्शग्रन्थे कविः दण्डी निरूपितवान्। अर्थात् काव्यशोभाकरः धर्मः अलङ्कारः। सोऽयमलङ्कारः द्विविधः -*

१) शब्दालङ्कारः । २) अर्थालङ्कारः

***शब्दालङ्कारः-शब्दश्रवणमात्रेण यत्र रमणीयता अनुभूयते तत्र शब्दालङ्कारः।***

***अर्थालङ्काराः-अर्थानुसन्धानेन यत्र रमणीयता प्रतीयते तत्र अर्थालङ्कारः ।***

अर्थालङ्कारस्य केचन भेदाः अत्र निरूपिताः ।

**१) उपमा**

**लक्षणम् - ''उपमा यत्र सादृश्यलक्ष्मीः उल्लसति द्वयोः।''** उपमालङ्कारे उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकशब्दः, चेति चत्वारः अंशाः भवन्ति।

उपमानम् - येन सह सादृश्यं वर्ण्यते तत् उपमानम् ।

उपमेयम् - वर्ण्यं वस्तु उपमेयम् ।

साधारणधर्मः - द्वयोः सादृश्यमेव साधारणधर्मः।

उपमावाचकाः - इव, वत्, सम, तुल्य, यथा, इत्यादयः ।

उदाहरणम् - कमलमिव चारु वदनम् ।

समन्वयः - उपमालङ्कारस्य अंशाः अस्मिन् उदाहरणे एवं भवन्ति ।

उपमानम् - कमलम् । उपमेयम् - वदनम् ।

साधारणधर्मः- चारुत्वम् (चारुता)। उपमावाचकम् - इव।

तथा - श्रीरामः समुद्र इव गम्भीरः ।

© KTBS NOT TO BE REPUBLISHED

२. **रूपकम्**

लक्षणम् - उपमान-उपमेययोः अभेदः रूपकम्।

उदाहरणम् - सौजन्यमेव सुवर्णम् ।

समन्वयः - अस्मिन् उदाहरणे -उपमान-उपमेययोः सुवर्ण-सौजन्ययोः अभेदः वर्णितः।

तथा - ज्ञानामृतं पीत्वा तुष्टः ।

३. **श्लेषः**

**लक्षणम् - अनेकार्थशब्दविन्यासः श्लेषः ।**

उदाहरणम् - माघे मेघे गतं वयः ।

समन्वयः - अत्र माघमासे मेघमध्ये पक्षी गतः इति एकः अर्थः। तथा माघकाव्यस्य मेघदूतकाव्यस्य च पठने आयुः एव गतम् इति द्वितीयः अर्थः।

तथा - सैन्धवमानय।

४. **सारालङ्कारः**

**लक्षणम् - उत्तरोत्तरमुत्कर्षः 'सार' इत्यभिधीयते। पूर्वपूर्वापेक्षया उत्तरोत्तरस्य उत्कर्षं यत्र वर्ण्यते तत्र सारालङ्कारः।**

उदाहरणम् - मधुरं मधु पीयूषं तस्मात्तस्मात् कवेर्वचः ।

समन्वयः - मधु मधुरम्, तस्मात् च पीयूषं मधुरम्, तस्मात् कवेः वचः मधुरम्, इति पूर्वपूर्वपदार्थापेक्षया उत्तरोत्तरपदार्थस्य उत्कर्षः अत्र वर्णितः ।

तथा - गिरिर्महान् गिरेरब्धिः महानब्धेः नभो महत् नभसोऽपि महद्ब्रह्म।

५. **अनन्वयः**

**लक्षणम् - उपमानोपमेयत्वं यदा एकस्यैव वस्तुनः ।**

उदाहरणम् - गङ्गा गङ्गेव पावनी ।

समन्वयः - अस्मिन् उदाहरणे 'गङ्गा' इति एकस्यैव वस्तुनः उपमानोपमेयत्वं प्रकल्पितम्।

तथा - इन्दुः इन्दुरिव श्रीमान् ।

*****

© KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

१. वचनामृतम् ।

२. मोदकैः ताडय ।

३. विद्या एव धनम् ।

४. कादम्बरी रसज्ञानाम् आहारोऽपि न रोचते ।

☞ **अध्ययनं कुरुत ।**

१. चन्द्रालोकः - जयदेवः

२. कुवलयानन्दः - अप्पय्यदीक्षितः

## क्रियाकलापः

चित्रं दृष्ट्वा वाक्यं रचयत ।



मुखम्
केशाः, मस्तकम्, कर्णः
वेणी, तिलकम्, दन्ताः
नयनम्, ललाटः, आस्यम्
कपोलः, नासिका

*****

@KTBS NOT TO BE REPUBLISHED

W5R3N3

## नवमः पाठः

## छन्दः

***छन्दोयुक्तपद्यं वृत्तं जातिश्चेति द्विधा विभक्तम्। अक्षरगणकं छन्दः वृत्तम्। मात्रागणकं छन्दः जातिः। अक्षरगणकं छन्दः सर्वत्र दृश्यते इति अत्र केषाञ्चन वृत्तानां परिचयः क्रियते।***

### १. इन्द्रवज्रा

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या - एकादश भवति ।

गणविन्यासक्रमः- त-त-ज-गुरु-गुरु। **लक्षणम्- स्यादिन्द्रवज्रा यदि तौ जगौ गः ।**

| | त | त | ज | गु गु |
|---|---|---|---|---|
| | – – ∪ | – – ∪ | ∪–∪ | – – |
| उदाहरणम् - | धर्मो हि | यत्नैः पु | रुषेण | कार्यः। |

### २. उपेन्द्रवज्रा

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या-एकादश भवति।

गणविन्यासक्रमः- ज-त-ज-गुरु गुरु । **लक्षणम्- उपेन्द्रवज्रा जतजास्ततो गौ**

| | ज | त | ज | गु गु |
|---|---|---|---|---|
| | ∪–∪ | – – ∪ | ∪–∪ | – – |
| उदाहरणम् - | पिबन्ति | नद्यः स्व | यमेव | नाम्भः। |

### ३. वंशस्थम्

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या-द्वादश भवति।

गणविन्यासक्रमः- ज - त - ज - र । लक्षणम्- जतौ तु वंशस्थमुदीरितं जरौ

| | ज | त | ज | र |
|---|---|---|---|---|
| | ∪–∪ | – – ∪ | ∪ –∪ | –∪– |
| उदाहरणम् - | मनीषि | णः सन्ति | न तेहि | तैषिणः। |

NOT TO BE REPUBLISHED @KTBS

### ४. वसन्ततिलका

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या - चतुर्दश भवति ।

गणविन्यासक्रमः - त - भ - ज - ज - गुरु - गुरु ।

**लक्षणम् - उक्ता वसन्ततिलका तभजाजगौ गः ।**

| | त | भ | ज | ज | गु गु |
|---|---|---|---|---|---|
| | – – ∪ | – ∪ ∪ | ∪ – ∪ | ∪ – ∪ | – – |
| उदाहरणम् - | दूरीक | रोति कु | मतिं वि | मलीक | रोति । |

### ५. मालिनी

अस्मिन् वृत्ते प्रतिपादम् अक्षराणां संख्या - पञ्चदश भवति ।

गणविन्यासक्रमः - न - न - म - य - य ।

**लक्षणम् - ननमयययुतेयं मालिनी भोगिलोकैः ।**

| | न | न | म | य | य |
|---|---|---|---|---|---|
| | ∪∪∪ | ∪∪∪ | – – – | ∪ – – | ∪ – – |
| उदाहरणम् - | उदय | ति यदि | भानुः प | श्चिमे दि | ग्विभागे । |

*****

## अभ्यासः

**१. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत ।**

१. क्षारं जलं वारिमुचः पिबन्ति ।
२. धर्मश्च जानाति नरस्य वृत्तम् ।
३. प्रलीनभूपालमपि स्थिरायति ।
४. संसारिकार्तिहरणं शरणं प्रपद्ये ।
५. वनभुवितनुमात्रत्राणमाज्ञापितं मे ।
६. मातेव रक्षति पितेव हिते नियुङ्क्ते ।
७. पुराणमित्येव न साधु सर्वम् ।

*****

NOT TO BE REPUBLISHED ©KTBS

R9J8P9

## विंशः पाठः

# पत्रलेखनम्

**I. वैयक्तिकपत्रम्  II. विरामपत्रम्  III. व्यावहारिकपत्रम्**

**I. 1) त्वं गिरिजा/गिरीशः इति मत्वा, प्रवासार्थं धनं प्रेषयितुं पितरं/मातरं प्रति पत्रं लिखत ।**

**श्रीः**

क्षेमम्

जयनगरम्

दिनाङ्कः २७-११-२०१७

पूज्यपितृ / मातृचरणारविन्दयोः साष्टाङ्गप्रणामाः ।

अहम् अत्र कुशली / कुशलिनी । भवन्तः अपि तत्र कुशलिनः इति मन्ये। मम अध्ययनम् सम्यक् प्रचलति । आगामि मासस्य प्रथमसप्ताहे मम विद्यालयस्य अध्यापकाः शैक्षणिकप्रवासार्थं देहलीनगरं गमिष्यन्ति । अहमपि तैः सह गन्तुमिच्छामि । एतदर्थं २००० रूप्यकाणि दातव्यानि भवन्ति। अतः गन्तुम् अनुमतिं ददातु । धनञ्च प्रेषयतु इति प्रार्थयामि । अन्यत् सर्वं कुशलम्। सर्वेभ्यः मम नमस्कारान् सूचयतु ।

भवदीयः / या

पुत्रः / पुत्री

गिरीशः/गिरिजा

पत्रसङ्केतः

| सकाशात् | सविधे मुद्रा |
|---|---|
| ........................ | ........................ |
| ........................ | ........................ |
| पिन् ५ ५ ३ ४ ० ० | पिन् ३ ० ० ४ १ २ |

©KTBS NOT TO BE REPUBLISHED

**२) नन्दनः बेङ्गलूरुनगरे निवसति। सः शिरसि नगरे विद्यमानं सहोदरं प्रति पत्रं लिखति।**

**श्रीः**

क्षेमम् दिनाङ्कः ५-५-२०१७

प्रियसहोदर नमस्काराः ।

अहमत्र कुशली । तत्रापि भवन्तः सर्वेऽपि कुशलिनः इति भावयामि। अत्र मम अध्ययनं सम्यक् प्रचलति । षाण्मासिकपरीक्षा समाप्ता। यथाक्रमं अस्मिन् वर्षेऽपि अहमेव प्रथमस्थानम् प्राप्तवान् । गुरवः सम्यक् बोधयन्ति । तेषां मार्गदर्शनेन वार्षिकपरीक्षायामपि उत्तमं फलितांशं प्राप्स्यामि इति मम उत्कटेच्छा अस्ति । मम विषये कापि चिन्ता न कार्या।

सर्वेभ्यः मम प्रणामाः।

भवतः सहोदरः

नन्दनः

पत्रसङ्केतः

| सकाशात् | सविधे **मुद्रा** |
|---|---|
| .......................... | .......................... |
| .......................... | .......................... |
| पिन् [ ][ ][ ][ ][ ][ ] | पिन् [ ][ ][ ][ ][ ][ ] |

@KTBS NOT TO BE REPUBLISHED

## II. विरामपत्रम्

**सकाशात्,**

सुधाकरः/सुधा
दशमकक्ष्या,
शारदाप्रौढशाला, धारवाडनगरम्

**सविधे,**

मान्याः मुख्योपाध्यायाः
शारदाप्रौढशाला, धारवाडनगरम्
मान्याः,

**विषयः** - विरामप्रार्थना ।

श्वः मम गृहे धार्मिकोत्सवः भविष्यति । अतः अहं शालां न आगमिष्यामि । कृपया एकस्य दिनस्य विरामं यच्छन्तु इति सविनयं प्रार्थये ।

धन्यवादाः

दिनाङ्कः : ३-३-२०१७ | भवदीयः/ भवदीया
स्थानम् : धारवाडनगरम् | विधेयःछात्रः/विधेया छात्रा
सुधाकरः/सुधा

© KTBS NOT TO BE REPUBLISHED

## III. पुस्तकप्रेषणाय पत्रम् ।

**सकाशात्**

गिरीशः / गौरी

गृहसंख्या - ३५, I उपमार्गः, III मुख्यमार्गः,

कालिदासनगरम्, कोलार ।

**सविधे**

मान्यव्यवस्थापकः

विद्याप्रकाशनम्, मङ्गलूरु ।

मान्याः,

**विषयः - पुस्तकार्थम् आवेदनम् ।**

भवत्प्रकाशितस्य 'व्याकरणप्रभा' इति पुस्तकस्य आवश्यकता अस्ति । कृपया यथाशीघ्रम् एकं पुस्तकम् प्रेषयतु इति प्रार्थये ।

धन्यवादाः ।

दिनाङ्कः २-११-२०१७ | भवतः विश्वासी/विश्वासिनी

स्थानम् : कालिदासनगरम्, कोलार । | गिरीशः / गौरी

पत्रसङ्केतः

| सकाशात् | सविधे **मुद्रा** |
|---|---|
| ........................ | ........................ |
| ........................ | ........................ |
| पिन् ☐☐☐☐☐☐ | पिन् ☐☐☐☐☐☐ |

©KTBS
NOT TO BE REPUBLISHED

## एकादशः पाठः

L2D9P9

## प्रबन्धः

प्रबन्धे विषयप्रस्तावना - विषयनिरूपणम् - उपसंहारः इति त्रयः भागाः संयोजनीयाः।

### (१) परिसरः

अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तानि एव परिसरशब्देन सूच्यन्ते। अस्माकं जीवननिर्वहणे परिसरस्य अतीव आवश्यकता अस्ति ।

परिसरमालिन्यानि त्रिविधानि। वायुमालिन्यं जलमालिन्यं, शब्दमालिन्यं च ।

**वायुमालिन्यम्** - बृहद्यन्त्रागारेभ्यः सर्वदा निस्सरद्भ्यः कलुषितविषानिलेभ्यः सर्वदा सञ्चरद्भ्यः शतशोऽथसहस्रशः वाहनानां धूमेभ्यः अपि वायुः प्रदूषितः।

**जलमालिन्यम्** - यन्त्रागारेभ्यः निष्कास्यमानानि रासायनिकवस्तुयुक्तानि दूषितजलानि, स्नानशौचालयानां मलिनजलानि च नालिकाभिः नदीं प्रति प्रेषयन्ति । एतेन जलमालिन्यं भवति ।

**शब्दमालिन्यम् -** यन्त्रागाराणां कर्कशशब्दैः ध्वनिवर्धकानां, विविधकार्याणां, वाहनानां च शब्दैः नित्यं प्रदूषणं वर्धते एव।

एवं परिसरप्रदूषणेन नानाविधाः रोगाः समुद्भवन्ति । प्रदुष्टेन परिसरेण न केवलं मानवाः अपि तु पशवः, पक्षिणः, कीटाः, जलचराश्च महतीं हानिम् अनुभवन्ति । एतस्य प्रतिक्रिया अधुना अवश्यं विधातव्या । एतदर्थं सर्वेजनाः जागरिताः भवेयुः। प्रशासनानि उद्योगपतींश्च बोधयेयुः । परिसरसंरक्षणार्थम् आवश्यककर्माणि कुर्युः।

### (२) सङ्गणकयन्त्रम्

'कम्प्यूटर्' यन्त्रस्य सङ्गणकम् इति नामधेयम् अस्ति। 'चार्ल्स् बाबेज्' इति आङ्ग्लविज्ञानी इदं यन्त्रम् आविष्कृतवान्। अस्मिन् यन्त्रे आन्तरिकयन्त्रभागः, बाह्ययन्त्रभागः इत्यादि विभागाः सन्ति ।

@KTBS NOT TO BE REPUBLISHED

सङ्गणकयन्त्रं तु विज्ञानस्य अत्यधिकं विकसितं बुद्धिमत् यन्त्रम्। सङ्गणकयन्त्रस्य आविष्कारेण विज्ञानक्षेत्रे महती क्रान्तिः अभवत्। आधुनिकशिक्षणे सङ्गणकयन्त्रज्ञ-ानम् अनिवार्यम्। मुद्रणम्, सञ्चारः, सैन्यं, तन्त्रज्ञानम्, विज्ञानं, संस्कृतिः, चिकित्सालयः इत्यादिक्षेत्रेषु अस्य व्यापकः प्रभावः अस्ति। अस्य गणनशक्तिः, स्मरणशक्तिः असाधारणा अस्ति। गणकयन्त्रक्षेत्रे नूतनमाविष्कारमेव अन्तर्जालम् । संस्कृतभाषा उत्तमसङ्गणकभाषा इति प्रयोगद्वारा प्रमाणिता अस्ति ।

सङ्गणकयन्त्रस्य प्रभावेण मानवाः अलसाः जाताः। सर्वाण्यपि कार्याणि कर्तुं सङ्गणकयन्त्रम् आश्रयन्ति। एतेन बुद्धिविकासः अवरुद्धः भवति। अतः अस्य उपयोगं जागरूकतया कुर्युः।

*****

## (३) समाचारपत्रम्

विश्वेऽस्मिन् प्रतिक्षणं विविधाः घटनाः सम्भवन्ति । एतासां घटनानां विचारान् सर्वेभ्यः जनेभ्यः शीघ्रं प्रापयितुं समूहमाध्यमाः प्रयतन्ते । तेषु समाचारपत्रम् अन्यतमम्। आधुनिकयुगे वार्तापत्रिकाः अतीवजनप्रियाः सन्ति। एताः प्रतिदिनं भूतभविष्यद्वर्तमानविचारान् सर्वत्र प्रापयन्ति । दैनिक-पाक्षिक-मासिक-वार्षिकरूपेण अनेकाः पत्रिकाः भवन्ति । एताः प्रादेशिक - राष्ट्रिय-अन्ताराष्ट्रियाः वार्ताः प्रकटीकुर्वन्ति । राजकीय - सामाजिक-धार्मिक-शैक्षणिक क्रीडा - मनोरञ्जनादिविविधविचाराः पत्रिकासु भवन्ति । पत्रिकाणां पठनेन ज्ञानाभिवृद्धिः भवति । सर्वासु भाषासु पत्रिकाः प्रकटीकुर्वन्ति। संस्कृतेऽपि सुधर्मा सम्भाषणसन्देशः गीर्वाणवाणी इत्यदिपत्रिकाः सन्ति ।

अधुना पत्रिकारङ्गोऽपि कलुषितः इव प्रतिभाति । तत्र वार्ताः पक्षपातिन्यः इव दृश्यन्ते। वस्तुनिष्ठाः विश्वसनीयाः विषयाः विरलाः भवन्ति । तथा न भवेयुः। देशस्य समाजस्य च हितचिन्तिकाः वार्तापत्रिकाः भवन्तु ।

*****

NOT TO BE REPUBLISHED ©KTBS

## (४) स्वातन्त्र्योत्सवः

अस्माकं देशः १९४७ तमे वर्षे स्वतन्त्रः अभवत् । जनाः पर्वरूपेण अस्य उत्सवस्य अनुष्ठानं कुर्वन्ति। अनेके वीराः देशस्य स्वातन्त्र्यप्राप्तये स्वप्राणान् अत्यजन्। अस्मिन् दिने तेषां संस्मरणं क्रियते । राजधान्याः देहल्याः रक्तदुर्गे प्रधानमन्त्री भाषणं करोति । अस्माभिः स्वदेशस्य स्वतन्त्रता अखण्डता च रक्षणीया । अस्माकं विद्यालये अपि स्वातन्त्र्योत्सवः आचर्यते । प्रधानाचार्यः प्रातः ध्वजारोहणं करोति छात्राः च मिलित्वा राष्ट्रगीतं गायन्ति। विद्यालये मधुरं अस्मभ्यं दीयते ।

अस्मिन् दिने राष्ट्रध्वजस्य राष्ट्रगीतस्य च गौरवं समर्पयन्ति । स्वातन्त्र्यवीराणां साहसं सम्पर्कमाध्यमेषु प्रसारयन्ति । इदानीं स्वतन्त्रभारतस्य प्रगतिः अस्माभिः करणीया। कीर्तिः प्रसारणीया । तदैव अस्माकं जीवनं धन्यं भविष्यति । वन्दे भारतमातरम् ।

*****

**अपारभूमिविस्तारम् अगण्यजनसङ्कुलम्।**

**राष्ट्रं सङ्घटनाहीनं प्रभवेन्नात्मरक्षणे।।**

@KTBS
NOT TO BE REPUBLISHED

द्वादशः पाठः

# सुभाषितानि-५-८

(कण्ठपाठः करणीयः)

*'सुभाषितम्' इत्यस्य अर्थः 'सूक्तिः', सदुक्तिः इति। संस्कृतसाहित्ये सुभाषितानि विशिष्टकाव्यप्रकारत्वेन परिगणितानि। तानि सुभाषितानि प्रायः लोकनीतिबोधकानि, मानवजीवनस्य समुन्नतेः सहायकानि च भवन्ति। तेषाम् अध्ययनेन मनः उल्लसति विकसति च। सुभाषितानि व्यवहारचातुर्यं बोधयन्ति सन्मार्गम् उपदिशन्ति च।*

न चोरहार्यं न च राजहार्यम्
न भ्रातृभाज्यं न च भारकारि
व्यये कृते वर्धत एव नित्यम्
विद्याधनं सर्वधनप्रधानम् ।।१।। - सुभाषितरत्नभाण्डागारः ।

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतिः ।।२।। - सुभाषितसुधानिधिः ।

क्षारं जलं वारिमुचः पिबन्ति ।
तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति ।।३।। - सुभाषितरत्नभाण्डागारः।

NOT TO BE REPUBLISHED
©KTBS

आदित्यचन्द्रावनलानिलौ च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ।।४।।  - महाभारतम् ।

सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः ।।५।।  - अध्यात्मरामायणम्।

उत्साहसम्पन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदञ्च
लक्ष्मीः स्वयं याति निवासहेतोः ।।६।।  - सुभाषितरत्नभाण्डागारः।

मनीषिणः सन्ति न ते हितैषिणः
हितैषिणः सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणां
यथौषधं स्वादु हितं च दुर्लभम् ।।७।।  - सुभाषितरत्नभाण्डागारः ।

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति
सङ्गः सतां किमु न मङ्गलमातनोति ।।८।।  - रसगङ्गाधरः ।

*****

NOT TO BE REPUBLISHED @KTBS

## विशेषांशाः

१. क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति इत्यादि - क्रियापादयोगे यं प्रति क्रोधादयः व्यक्ता भवन्ति तत् सूचकं पदं चतुर्थीविभक्त्यन्तं भवति ।

१) कंसः कृष्णाय क्रुध्यति । २) सुयोधनः भीमाय द्रुह्यति ।

३) नृपः शत्रवे ईर्ष्यति । ४) दरिद्रः धनिकाय असूयति ।

पाणिनीयसूत्रम् - क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।

## अन्वयार्थः

१. **न चोरहार्यम्** = चोरैः अपहर्तुं न शक्यते, **च न राजहार्यम्** = राजभिः शुल्करूपेण आदातुं न शक्यते, **न भ्रातृभाज्यम्** = सोदरैः विभक्तुं असाध्यम्, च न **भारकारि** = वोढुं भारमपि न भवति, **व्यये कृते** = उपयोगे कृते सति, **नित्यं वर्धते एव**= सदा वर्धते, **विद्याधनम्**= ज्ञानसम्पत्, **सर्वधनप्रधानम्**= सर्वश्रेष्ठा सम्पत्।

२. **नद्यः**=सरितः, **स्वयम् एव** = आत्मानः एव, **अम्भः** = जलं, **न पिबन्ति।** वृक्षाः = तरवः, **फलानि** = स्वस्य फलानि, **स्वयम्** = आत्मान एव, **न खादन्ति** = न भक्षयन्ति। **वारिवाहाः**=मेघाः, **सस्यं** = तृण-पर्ण-फलादिकं, **न अदन्ति खलु** = न भक्षयन्ति किल?, **सताम्** = सज्जनानां, **विभूतिः** = सम्पदः **परोपकाराय** = अन्येषाम् उपकाराय, **भवन्ति** = वर्तन्ते ।

३. **वारिमुचः** = मेघाः, **क्षारं जलम्** = लवणांशयुक्तं जलम्, **पिबन्ति** = स्वीकुर्वन्ति (आददति)। **तदेव** = तत् जलम् एव, **मधुरं कृत्वा** = स्वादु कृत्वा, **वमन्ति** = त्यजन्ति। **तथा** = तेन प्रकारेण, **सन्तः** = सज्जनाः, **दुर्जनदुर्वचांसि** = दुष्टानां कठोरवचनानि, **पीत्वा** = स्वीकृत्य, **सूक्तानि** = सुष्ठु वचनानि, **समुद्गिरन्ति** = भाषन्ते ।

४. आदित्यचन्द्रौ= सूर्याचन्द्रमसौ, अनिलानिलौ=अग्निःवायुश्च च द्यौः= आकाशम्

©KTBS NOT TO BE REPUBLISHED

भूमिः=धरणिः, आपः = जलम्, हृदयम् = मनः च यमः = यमधर्मराजः अहः = दिवा, रात्रिः = निशा, च उभे च सन्ध्ये=प्रातःसन्ध्या सायं सन्ध्या च धर्मः = धर्मः च, नरस्य=मानवस्य, वृत्तम्=आचारम् अवगच्छति=जानाति।

५. **सुखस्य** = सन्तोषस्य, **दुःखस्य** = कष्टस्य च, **कोऽपि** = कश्चिदपि, **दाता न** = प्रदाता न भवति। **परः** = अन्यः, **ददाति** =यच्छति, **इति एषा कुबुद्धिः** = निन्द्यामतिः, **(एवम्) अहं करोमि** = स्वयं सम्पादयामि इति, **अभिमानः** = अहङ्कारः, **वृथा** = निरर्थकः। **(यतः) लोकः** = जनस्तु, **स्वकर्मसूत्रग्रथितः** = स्वीयकर्मरूपेण सूत्रेण बद्धः ।

६. **उत्साहसम्पन्नम्** = उत्साहशालिनम्, **अदीर्घसूत्रम्** = अचिरकारिणम्, **क्रियाविधिज्ञम्** = कार्यविधानज्ञम्, **व्यसनेषु असक्तम्** = दुरभिरुचि-विषयेषु अनासक्तम्, **शूरम्** = शौर्यशालिनम्, **कृतज्ञम्** = उपकारस्य स्मर्तारम्, **च = अपि** च, **दृढसौहृदम्** = गाढमैत्रीयुक्तम् पुरुषम्, **निवासहेतोः** = वासार्थम्, **लक्ष्मीः** = श्रीः, **स्वयं याति** = स्वयं गच्छति ।

७. **मनीषिणः** =प्राज्ञाः, **सन्ति** = वर्तन्ते। ते = प्राज्ञाः, **हितैषिणः न** = हिता-कांक्षिणः न भवन्ति, **हितैषिणः** = हितेच्छवः, **सन्ति** = वर्तन्ते। **ते** = हितेच्छवः, **न मनीषिणः** = प्राज्ञाः न भवन्ति, **नृणां** = मानवानां, **सुहृद्** = स्नेहगुणयुक्तः, अपि च, **विद्वान्** = विद्यावान् नरः, **दुर्लभः** = कष्टेन प्राप्तुं योग्यः, **यथा** = येन प्रकारेण, **हितं** = हितकारि, **स्वादु** च = मधुरं च, **औषधम्** = भैषजम्, **दुर्लभम्** = प्राप्तुं कष्टसाध्यम् ।

८. **सतां सङ्गः** = सत्पुरुषाणां सहवासः, **कुमतिं** = दुर्बुद्धिम्, **दूरीकरोति** = अपाकरोति। **चेतः** = चित्तम्, **विमलीकरोति** = शुद्धीकरोति। **चिरन्तनम्** = सञ्चितम्, **अघं** = पापं, **चुलुकीकरोति** = निश्शेषतया पिबति। **किं च** = अपि च, **भूतेषु** = प्राणिषु, **करुणां** = दयागुणं, **बहुलीकरोति** = अधिकं करोति । **मङ्गलम्** = शुभम्, **न आतनोति किम् ?** = न जनयति किम्? अवश्यं करोति इत्यर्थः ।

© KTBS NOT TO BE REPUBLISHED

**कविपरिचयः :**



**कविः** - कालिदासः ।

**कालः** - क्रि.श. प्रथमं चतुर्थं अथवा पञ्चमं शतकम् ।

**देशः** - उज्जयिनी ।

**आश्रयदाता**- विक्रमादित्यः ।

**कृतयः** - रघुवंशम्, कुमारसम्भवम् इति महाकाव्यद्वयम्। मेघदूतम्, ऋतुसंहारश्चेति खण्डकाव्यद्वयम् । विक्रमोर्वशीयम्, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलञ्चेति नाटकत्रयम्।

प्रशंसा - कविकुलगुरुः, उपमाकालिदास्य इत्यादयः।

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. केषां विभूतयः परोपकाराय भवन्ति ?

२. कीदृशम् औषधं दुर्लभम् ?

३. वारिमुचः कीदृशं जलं पिबन्ति ?

४. लोकः केन ग्रथितः ?

२. **संयोज्य लिखत ।**

| **अ** | **आ** |
|---|---|
| १. सतां सङ्गः | मनः विकसति । |
| २. आदित्यः | कुमतिं दूरीकरोति । |
| ३. नद्यः | नरस्य वृत्तं जानाति । |
| ४. सुभाषिताध्ययनेन | अम्भः स्वयं न पिबन्ति । |

©KTBS NOT TO BE REPUBLISHED

**३. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।**

१. धर्मः नरस्य वृत्तं जानाति ।

२. भाग्यानि काले फलन्ति ।

३. सतां सङ्गः कुमतिं दूरीकरोति ।

**४. समानार्थकं पदं लिखत ।**

१. वारिवाहः २. मनीषी

३. आपः ४. अनलः

**५. विरुद्धार्थकपदं लिखत ।**

१. मधुरम् २. कुमतिः

३. अघम् ४. दुर्लभम्

**६. सन्धिं विभाज्य नाम लिखत ।**

१. यस्योभयम् २. नाम्भः

३. कुबुद्धिरेषा ४. व्यसनेष्वसक्तः

**७. लघूत्तरं लिखत ।**

१. नरस्य वृत्तं के जानन्ति ?

२. सतां सङ्गः किं किं करोति ?

३. कीदृशं पुरुषं लक्ष्मीः निवासहेतोः स्वयं याति?

*****

©KTBS NOT TO BE REPUBLISHED

## पूरकपाठौ

# १. नगाधिराजः

***भरतखण्डोऽयं तिसृषु दिक्षु सामुद्रजलैरावृतः उत्तरस्यां तु नगाधिराजेन हिमवता संरक्ष्यमाणोऽस्ति। भारतीयानां समेषां हृदये गिरिराजस्य अस्य महत्त्वपूर्णं स्थानं दत्तमस्ति। प्रपञ्चे अनुपमस्य भूधरस्यास्य वैशिष्ट्यं वेद-स्मृति-पुराण-इतिहासेषु वैज्ञानिकक्षेत्रेष्वपि उद्गीयमानमस्ति ।***

हिमालयपर्वतश्रेणी भारत-पाकिस्तान-भूतान-चीना-नेपाल इत्यादि देशान् अभिव्याप्य वर्तते। हिमालयः भारतीयजनानां दृष्ट्या न केवलं कश्चित् भूप्रदेशः अपि तु मोक्षद्वारम्। शिवस्य पत्नी भगवती सतीदेवी हिमवतः पुत्री भूत्वा अजायत। अत्रैव तपसा शिवं तोषयित्वा तं परिणीतवतीति पुराणकथा प्रसिद्धा। देवाः सदा अत्र रमन्ते इति भारतीयानां दृढः विश्वासः। अनेके ऋषयः मुनयश्च अत्र तपस्तप्त्वा परां सिद्धिं प्राप्नुवन्। अत्रत्यानां पुण्यक्षेत्राणां स्मरणेन दर्शनेन च स्वान् धन्यान् मन्यन्ते भारतीयाः। तादृशपुण्यक्षेत्रेषु अमरनाथगुहापि अन्यतमा। गुहायां प्रतिहायनं हिमलिङ्गं श्रावणमासे दर्शनयोग्यं भवति।

अस्य विषये एका पुराणकथास्ति- कदाचित् पार्वतीदेवी शङ्करमपृच्छत् ''अहं तु प्रत्येकस्मिन् जन्मन्यपि तपसा अजरामरं त्वामेव पतित्वेन वृणोमि। त्वन्तु अनादिरनन्तः, मया किमर्थं जन्म दोषोऽनुभूयते? तस्य परिहारः कः?'' इति। अतिनिर्बन्धकारणात् शङ्करः अमरत्वप्राप्तिकथां कस्याञ्चित् गुहायां स्वपत्न्यै श्रावयामास। मध्ये पार्वती सुप्ता। विना अनुज्ञां तत्रागतौ श्वेतपारावतौ कथां श्रुतवन्तौ अमरत्वं प्राप्तवन्तौ। तज्ज्ञात्वा क्रुद्धः शिवः तौ दग्धुम् इच्छति। तद्दृष्ट्वा भीतौ ''तव वचनमलीकं न स्यात्। अतः रहःश्रवणरूपम् आवयोरपराधं क्षमस्व। सदा शिवपार्वत्योः दर्शनमावयोः भवतु'' इति प्रार्थितवन्तौ। शान्तः शिवः ''प्रतिसंवत्सरं मासमधितिष्ठावः। तदा अत्र समुद्भूतहिमलिङ्गदर्शनेन सर्वपापानि भस्मसाद्भवन्ति'' इति अनुगृह्य पार्वत्या सह अन्तरधात्।

© KTBS NOT TO BE REPUBLISHED



अयं हिमालयः नैकेषां वैशिष्ट्यानामायतनम्। अत्यन्तशुद्धमधुरजलानाम् आकराः हिमनद्यः अत्र दृश्यन्ते। बृहद्गात्राः हिमप्रस्तराः शनैः सञ्चरन्तः भवन्ति त एव हिमनदीशब्देन आहूयन्ते। भरतखण्डस्य हिमनदीषु गङ्गोत्री, यमुनोत्री, लडाक् च प्रसिद्धाः।

**कविकुलगुरुः कालिदासस्तु -**

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य स्थित : पृथिव्या : इव मानदण्ड :।। इति स्तौति**

भारतं संरक्षितुं सन्नद्धः बद्धपरिकरः योद्धा इव हिमवान् दृश्यते। तस्य उन्नतशिखराणि आर्टिक् प्रदेशात् आवहन्तं शीतवायुं अवरुन्धन्ति। कतिपयवर्षेभ्यः पूर्वं रष्यादेशे सम्भूतात् अणुविद्युस्थावरस्य दुष्प्रभावात् अणुविकिरणाच्च अस्मानरक्षन्। गिरयः ते 'मानसून्' इति मारुतं निरुध्य भारते विपुलवृष्टेः कारणानि च भवन्ति। तुहिनगिरेः शिखराणि सदैव हिमाच्छादितानि भवन्ति। तत्र गमनागमनम् अतीव दुष्करम्। अत एव उत्तरतः आक्रमणं भरतखण्डस्योपरि बहुन्यूनमस्ति। तादृशप्रदेशात् सीमामुल्लङ्घ्य अतिक्रमणं दुस्साध्यम्।

रुद्ररमणीयोऽयं हिमालयः सहस्राधिकवर्षेभ्यः प्रकृतिप्रियाणां, संशोधकानां श्रद्धालूनां च आकर्षकं स्थानम्। नानाविधजीवसङ्कुलानां ओषधिवनस्पतीनां च आश्रयदाता अस्ति। एतादृशं बहूपकारकं हिमवन्तम् एवं स्तुमः।

संरक्षकाय देशस्य देवानां निलयाय च ।
सौन्दर्यगुणभूषाय शैलराजाय ते नमः ।।१।।

*****

**श्लोकतात्पर्यम्**

देवतात्मा=देवतानाम् अधिष्ठानभूतः, पूर्वपरौ=पूर्वपश्चिमौ, तोयनिधी=समुद्रौ, वगाह्य=प्रविश्य, पृथिव्याः=भूमेः, मानदण्डः=आयामपरिच्छेदकदण्डः इव स्थितः (मीयते अनेन इति मानम्) हिमालयः नाम=हिमालयसंज्ञकः, नगाधिराजः =पर्वतश्रेष्ठः, उत्तरस्यां दिशि = उत्तरदिशायाम्, अस्ति=विद्यते ।।१।। (कुमारसम्भवम्)

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. भरतखण्डः तिसृषु दिक्षु कैः आवृतः ?
२. हिमलिङ्गं कदा दर्शनयोग्यं भवति ?
३. कौ अमरत्वं प्राप्तवन्तौ ?
४. श्वेत पारावतौ दग्धुं कः इच्छति ?

**२. चतुर्थपदं लिखत।**

१. रष्यादेश : अणुविकिरण :: आर्टिक् प्रदेशः ...............
२. शिखराणि : हिमच्छादितानि :: गमनागमनम् : ................
३. 'सह' इति अव्ययययोगे : तृतीया :: नमःइति अव्ययययोगेः ..............
४. प्रत्येकस्मिन् - यण्सन्धि :: दोषोऽनुभूयतेः ..............

©KTBS NOT TO BE REPUBLISHED

**३. दशभिः वाक्यैः उत्तरं संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लिखत।**

१. ''भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान्'' कथम्?इति विवृणुत ।

२. अमरनाथगुहाविषये का पुराणकथा अस्ति ?

## अवधेयांशः

भगीरथप्रार्थनानन्तरं सन्तुष्टः शिवः स्वजटया बद्धां गङ्गां बिन्दुसरः प्रति मुमोच । विमुक्ता सा सप्तसु धारासु प्रवहति। तस्याः सप्तस्रोतांसि अभवन् । स च विषयः एवं वर्णितः रामायणे - विसर्जतो ततो गङ्गां हरो बिन्दुसरः प्रति ।

तस्यां विसृज्यमानायां सप्तस्रोतांसि जज्ञिरे।।२।।

**सप्तस्रोतांसि** - ह्लादिनी पावनी चैव नलिनी च तथा परा।
तिस्रः प्राचीं दिशं जग्मुः गङ्गाः शिवजलाः शुभाः।।
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी।
तिस्रस्त्वेता दिशं जग्मुः प्रतीचीन्तु शुभोदकाः।।
तथैवालकनन्दा च विश्रुता लोकपावनी ।
सप्तमी चान्वगास्तासां भगीरथमथो नृपम् ।।

*****

©KTBS NOT TO BE REPUBLISHED

## २. भगवान् रमणमहर्षिः



भरतखण्डोऽयं तपोधनानां, साधकानां सिद्धभूमिः, विदुषां विद्याक्षेत्रं, कविवराणां काव्योद्यानम्, विज्ञानिनां प्रयोगालयश्च विद्यते । पुण्यदेशेऽस्मिन् नैके तापसाः तपश्चक्रुः कुर्वन्तश्च सन्ति । एतेषां समेषां तपोबलेनैव धरिणीतले पुण्यभूरिति प्रसिद्धिमापन्नमासीदिदं भारतवर्षम् । ईदृश्यां पवित्रभूम्यां अस्माकं जन्म अभवदिति वयं पुण्यभाजः इत्यत्र नास्ति संशयलेशोऽपि । अत एव अस्माभिः अवश्यमस्माकं पूर्वजानां ऋषिवरेण्यानां जीवनगाथा गातव्या अस्ति । तद्धेतोरेवात्र रमणमहर्षेः लघुपरिचयः प्रदत्तो वर्तते ।

तमिलनाडुप्रदेशे लघुराप्रदेशात् त्रिंशत् मैलदूरे तिरुचुळिपुरं वर्तते । तत्र सुन्दरम् अय्यर् नामकः कश्चन सज्जनः वसति स्म । न्यायशास्त्रम् अधीत्य सः न्यायवादिवृत्तिम् अवलम्ब्य जीवति स्म । अलगम्माळ् इति तस्य पत्न्याः नाम । तावुभावपि धार्मिकजीवनेन सम्पन्नौ भूत्वा सुखेन जीवतः स्म । तयोः पुण्यदम्पत्योः

द्वितीयपुत्ररूपेण जातः श्रीवेङ्कटरमणः । १८७९ क्रिस्ताब्दस्य डिसेम्बर् मासस्य त्रिंशत् दिनाङ्के (३०-१२-१८७९) अस्य जन्म अभवत् ।

बाल्यादेव रमणस्य मेधा विलक्षणा । एकवारं श्रुतं चेत् स्मरणे संस्थाप्य सर्वमपि पुनः वक्तुं समर्थः आसीत् । तस्य न केवलम् अध्ययने आसक्तिः परन्तु क्रीडासु अपि रुचिः आसीत् । अन्येषाम् अपेक्षया अस्य चिन्तनं भिन्नमासीत् । व्यवहारोऽपि विभिन्नः भवति स्म । रमणः सदा ध्यानमग्नः भवति स्म । मन्दिरेषु गत्वा स्तोत्रपठनादिषु देवभजनादिषु निरतः आसीत् ।

गच्छता कालेन रमणस्य मनः परिपक्वम् अभवत् । तस्य बाह्यविषयेषु अनास्था वर्धिता । यस्मिन् विज्ञाते सर्वमपि विज्ञातं भवति तदेव शरणं व्रजामि इति निश्चित्य सः एकस्मिन् दिने अस्य जगतः पितरम् अरुणाचलेश्वरं (भगवतः) शरणं गन्तुं प्रस्थितः । गृहत्यागात्पूर्वं सः स्वस्य भ्रातरम् उद्दिश्य अहम् अधुना भगवतः अन्वेषणे प्रस्थितः अस्मि, न केनापि मम कृते चिन्ता करणीया इति लेखं लिखित्वा, तं लेखं गृहे स्थापयित्वा अरुणाचलेश्वरस्य दर्शनार्थं 'तिरुवण्णामलै' प्रति अगमत् । तत्र गत्वा सर्वविधं सांसारिकचिह्नं परित्यज्य 'संन्यासी' अभवत् । मन्दिरेषु मौनेन उपविश्य ध्यानमग्नः अभवत् ।

तस्मिन् काले आन्ध्रदेशे गणपतिनामकः मेधावी मन्त्रवेत्ता वसति स्म । सः तन्त्रं, ज्यौतिषं, वेदाङ्गानि न्यायादिशास्त्राणि च सम्यक् अधीतवान् । किन्तु तस्य मनसि प्रशान्तता न आसीत् । कदाचित् सः रमणं प्रति आगत्य दण्डवत् प्रणम्य स्वसमस्यायाः परिहारमयाचत । गणपतिमुनिना सम्प्रार्थितः रमणः मौनव्रतात् बहिः आगत्य एतैः शब्दैः गणपतिमुनिम् एवम् उद्बोधितवान् । -'अहम्' इति कुतः आयाति इति यदि अनुसन्दधासि तर्हि मनः तत्रैव संलग्नं भवेत् । मन्त्रोच्चारणसमये अपि मन्त्रस्य उद्भवस्थानम् अवेक्षसे । अर्थानुसन्धानं च करोषि । तर्हि मनः तत्रैव लग्नं भवति। मनोविकारः न भवति । एतदेव तपः । अयमेव मनसः

NOT TO BE REPUBLISHED © KTBS

शान्तिप्राप्त्युपाय: इति। अनेन सन्तुष्ट: गणपतिमुनि: आत्मानं धन्यं मत्वा तत्रत्यान् संबोध्य उक्तवान् - अयि भो: मित्रवर्या: ! अयं रमण: अद्यप्रभृति सर्वेषां कृते ''भगवान् रमणमहर्षि:'' भवति।

तस्मिन्नवसरे पाल् ब्रण्टन् नामक: कश्चन विदेशीय: भारतदेशस्य आध्यात्मिकम् औन्नत्यम् अवगम्य भारतम् आगच्छत् । स: बहुषु प्रदेशेषु परिभ्रम्य बहून् ऋषीन् योगिन:, साधूंश्च दृष्टवान् । एवमेव रमणमहर्षिमपि द्रष्टुम् अरुणाचलमगमत् । गमनावसरे तस्य मनसि आध्यात्मिका: बहव: प्रश्ना समुद्भूता:। स: पाल् ब्रण्टन् महोदय: प्रश्नानां चीटिकया सह रमणमहर्षे: पुरत: प्रणामं कृत्वा उपविष्ट:। आश्रमे सर्वत्र प्रशान्तता आसीत् । रमणमहर्षि: मौनेन उपविष्ट: आसीत् । पाल् ब्रण्टन् रमणमहर्षे: नयने स एव पश्यन् आसीत् । रमणमहर्षि: अपि निश्चलया, निर्विकारया, दृशा तस्य नयनयो: पश्यन्नभवत् । सहसा कश्चन विद्युत्तरङ्ग: इव शरीरं प्रविष्ट: इव ब्रण्टन् महोदयस्य। तदा स: काञ्चन प्रशान्तताम् अनुभवन् सर्वं विस्मृतवान् । अलौकिक: अयम् अनुभव: तं विवशम् अकरोत् । यदा स: ब्रण्टन् महोदय: बाह्यस्पृशं प्राप्तवान् तदा तस्य मन: प्रसन्नं प्रशान्तश्चासीत् । रमणमहर्षे: मुखे सा एव प्रसन्नता स एव मन्दहास: च विराजते स्म । अनन्तरं कश्चन आगत्य ब्रण्टन् महोदयं प्रश्नान् प्रष्टुम् उक्तवान् । तदा ब्रण्टन् महोदय: समन्दहास: अवदत्- मम प्रश्नानां सर्वाणि उत्तराणि मौने एव प्राप्तानि इति ।

भगवत: रमणमहर्षे: उपदेशा: आचरणयोग्या: भवन्ति । स्वयं कौपीनधारी मौनव्रत: । तस्य सम्पत्ति: केवलम् आत्मज्ञानम् । शान्ति:, सर्वप्राणिसमभावना, दया, निर्विकारता इत्यादय: गुणा: तस्य सहजानि आभरणानि आसन् । तस्य आश्रमे सर्वेषां कृते प्रवेश: सुलभ: । जातिवर्णभेद: तत्र नासीत् । न केवलं मनुष्येषु पशुपक्षिषु अपि रमणमहर्षि: समभावं दर्शयति स्म ।

१९५० क्रिस्ताब्दस्य एप्रिल्मासे १४ शुक्रवासरे सायं भक्ता: अरुणाचले शिवस्तोत्रं गायन्ति स्म । तत् श्रृण्वन् एव रमणमहर्षि: परन्धाम प्राप ।

© KTBS NOT TO BE REPUBLISHED

एवम् आजीवनं निर्विकल्पसमाधिम् अनुभूय भगवान् रमणमहर्षिः महासमाधिं प्राप्तवान् । आधुनिककाले महर्षित्वं स्वजीवनेन दर्शयित्वा भारतीयैः पाश्चात्यैश्च श्रेष्ठजनैः प्रकीर्तितः एषः महानुभावः महर्षिमण्डले आचन्द्रार्कं विराजते ।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. रमणमहर्षेः मातापितरौ कौ ?

२. रमणमहर्षेः कस्मिन् विषये अनास्था आसीत् ?

३. गणपतिमुनिः किमर्थं रमणमहर्षेः समीपमागतः ?

४. पाल् ब्रण्टन् महोदयस्य प्रश्नानाम् उत्तराणि कथं लब्धानि ?

५. रमणमहर्षेः सहजानि आभरणानि कानि ?

**२. चतुर्थं पदं लिखत ।**

१. गत्वा -क्त्वा प्रत्ययः :: गच्छता............................।

२. मेधावी-नकारान्तः :: मन्त्रवेत्ता.......................।

३. गणपतिः- मुनिः ::रमणः ............................।

४. आसीत्-लङ् लकारः ::प्राप............................।

**३. दशवाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कन्नडभाषया वा उत्तरं लिखत ।**

१. भगवान् रमणमहर्षिः महर्षित्वं स्वजीवनेन दर्शितवान् विवृणुत ।

*****

NOT TO BE REPUBLISHED @KTBS

# परिशिष्टम्

## अपठितगद्यभागः

१. चाणक्यः मगधदेशस्य चन्द्रगुप्तमौर्यस्य मन्त्री आसीत्। सः एकस्मिन् उटजे वसति स्म। एकदा राजा दरिद्रेभ्यः दातुं कम्बलान् दत्तवान्। केचन चोराः कम्बलान् चोरयितुं चाणक्यस्य उटजम् आगताः। तदा शीतकालः आसीत्। तथापि चाणक्यः कम्बलं विना एव भूमौ सुप्तः आसीत्। आश्चर्यचकिताः चोराः चाणक्यं प्रबोधितवन्तः। ते अपृच्छन् - ''अत्र तु अनेके कम्बलाः सन्ति। शैत्यमपि अस्ति। तथापि त्वं किमर्थं भूमौ कम्बलं विना शयनं करोषि'' तदा चाणक्यः अवदत् - ''दरिद्रेभ्यः दातुं राजा दत्तवान्, एतान् कम्बलान्। एते मम कृते न''। एतत् श्रुत्वा चोराः अपि सज्जनाः अभवन्। अन्येषां द्रव्यस्य उपयोगः अधर्मः इति चाणक्यस्य सन्देशः।

**प्रश्नाः**

१. चाणक्यः कस्य मन्त्री आसीत् ?
२. राजा चाणक्याय किम् अयच्छत् ?
३. चाणक्यस्य उटजं के आगताः ?
४. राजा दरिद्रेभ्यः दातुं ...... दत्तवान् ।
५. चाणक्यस्य सन्देशः कः ?

NOT TO BE REPUBLISHED @KTBS

---

२. अस्माकं राष्ट्रपिता गान्धिमहोदयः। 'मोहनदासकरमचन्द गान्धी' अस्य पूर्णनाम। अयं शान्तस्वभावः सत्यवादी च। अहिंसया सत्येन च जगत् अजयत्। अयं शुक्लसंवत्सरे भाद्रपदमासे कृष्णपक्षे एकादश्यां(२-१०-१८६९)शनिवासरे पोर्बन्दरनगरे जातः। अस्य पत्नी कस्तूरीबाई नाम्नी। सा सर्वदा भर्तारमनुसृतवती।

स्वातन्त्र्यसङ्ग्रामे अस्य महत् योगदानम्। अयं बहुवारम् उपवासम् अकरोत् कारागृहं च प्राविशत्। अमुं भूलोके सर्वे जानन्ति। अमुं सर्वे पूजयन्ति। अयं प्रतिदिनं गीतां पठति स्म। एषः संस्कृतभाषां सम्यक् पठितवान्। राष्ट्रपित्रे तस्मै नमः।

**प्रश्नाः -**

१. गान्धिमहाभागस्य पूर्णनाम किम् ?

२. सत्यवादी कः ?

३. 'पत्नी' - अत्र अन्यलिङ्गरूपं किम् ?

४. कं सर्वे पूजयन्ति ?

५. एषः .......... सम्यक् पठितवान् ।

---

३. हसंस्य वर्णः शुभ्रः। काकस्य वर्णः कृष्णः। एकदा कश्चित् काकः तडागस्य तीरं गच्छति। सः तत्र हंसं पश्यति। सः वदति - ''अहो! हंसः कीदृशः शुभ्रः अस्ति। अहम् अपि शुभ्रः भवामि''। अनन्तरं सः काकः जलाशयस्य जलेन निजं शरीरं प्रक्षालयति । तदा सः पाषाणस्य खण्डेन स्वशरीरं घर्षति । वारं वारं घर्षति सः तथापि कृष्णः वर्णः शुभ्रः न भवति। घर्षणेन तस्य शरीरे तीव्रा वेदना भवति । अन्ते सः पञ्चत्वं गच्छति। अहो! काकस्य मूर्खता।

**प्रश्नाः**

१. हंसस्य वर्णः कः ?

२. 'काकस्य वर्णः कः?

३. कस्य शरीरे तीव्रा वेदना भवति ?

४. अन्ते काकस्य गतिः का ?

५. काकः केन स्वशरीरं घर्षति ?

©KTBS NOT TO BE REPUBLISHED

४. कश्चित् राजा चोरं शूलमारोपयितुम् आदिशति। बुद्धिमुपयुज्य जीवामि' इति चिन्तयन् चोरः वदति - 'प्रभो! अहं सुवर्णकृषिं जानामि । सुवर्णबीजानि मया सह वर्तन्ते। क्षेत्राणि सज्जीकुर्वन्तु, भवन्तः एव बीजानि वपन्तु । तदनन्तरं मां शूलमारोपयन्तु। तेन जगतः कल्याणं भवतु' इति । राजा तथैवाङ्गीकरोति। क्षेत्राणि सिद्धानि भवन्ति । यः कदापि यत्किमपि चौर्यम् नाकृतवान् तादृशः सुवर्णबीजानि वपेत् इति नियमः इति चोरः वदति। आबाल्यं स्वकीयं चौर्यं स्मरन्तः तूष्णीं भवन्ति सर्वेऽपि। तदा 'यः कोऽपि अचोरः नास्ति चेत् अहमेव किमर्थं शूलमारोपयितव्यः'? इति सः पृच्छति। राजा लज्जया तं मोचयति।

प्रश्नाः

१. सुवर्णबीजवपनस्य नियमः कः ?

२. चोरः किं चिन्तयति ?

३. 'भवतु' अत्र कः लकारः ?

४. 'राजा' अस्य पदस्य पर्यायपदं किम् ?

५. चोरः सर्वान् किं पृच्छति ?

---

५. श्रीकृष्णः धर्मराजस्य वाचमङ्गीकृत्य दुर्योधनस्य समीपं सन्धानार्थं गच्छति । दुर्योधनसभां प्रविश्य अर्धराज्यं पाण्डवेभ्यः दातुं वदति। 'राज्यं कदापि दानरूपेण नैव दीयते। तत् युद्धे विजित्य प्राप्तव्यं भवति' इति दुर्योधनः वक्ति। तदा श्रीकृष्णः 'ज्ञातिनां मध्ये सङ्घर्षः नोचितः, युद्धं तु शत्रूणां मध्ये उचितम्' इति अवगमयितुं प्रयतते। परन्तु दुर्योधनः 'ते देवपुत्राः, वयं तु मानवाः, तदा कथं ते सम्बन्धिनः अस्माकं भवन्ति...? अहन्तु तेभ्यः वाटिकामपि नैव यच्छामि, यदि शक्तिरस्ति युद्धे अस्मान् पराजित्य राज्यं लभन्ताम्' इति दर्पेण गदति। तत् श्रुत्वा 'विनाशकाले विपरीतबुद्धिः, अहङ्कारः न क्वापि हिताय' इति चिन्तयन् श्रीकृष्णः युद्धमेव निश्चित्य धर्मराजसमीपं व्रजते।

NOT TO BE REPUBLISHED ©KTBS

प्रश्नाः

१. दुर्योधनः पाण्डवैः सह तस्य सम्बन्धः नास्तीति कथं निरूपयति?

२. श्रीकृष्णः किमर्थं दुर्योधनसभां गच्छति?

३. राज्यं कथं प्राप्तव्यं भवति?

४. 'समीपम्' अस्य विरुद्धार्थकं पदं किम् ?

५. 'ज्ञाति' अस्य पदस्य समानार्थकं पदं किम् ?

---

६. प्राणिनः अस्माकं मित्राणि सन्ति। मृगालये प्राणिनः अस्माकं मनांसि रञ्जयन्ति। मृगालये व्याघ्रः, जम्बूकः, सिंहः, वानरः, मकरः, शशकः, हरिणः इत्यादिमृगाः वसन्ति। सिंहः उच्चैः गर्जति। वानरः पञ्जरे भ्रमति। तस्य पुच्छः दीर्घः भवति। मकरः जले निवसति। मयूरः नृत्यति, मयूरः अस्माकं राष्ट्रपक्षी। गजः तृणम् इक्षुदण्डं च खादति। हरिणः धावति। मृगालयः मनसः सन्तोषं जनयति।

प्रश्नाः -

१. मृगालयः किं जनयति?

२. मकरः कुत्र वसति?

३. मयूरः अस्माकं ............. पक्षी।

४. के अस्माकं मित्राणि सन्ति?

> द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
> सुभाषितरसस्याग्रे सुधा भीता दिवङ्गता।।

*****

@KTBS NOT TO BE REPUBLISHED

## २. अनुवादः

*** कर्नाटकभाषाया, आङ्ग्लभाषया वा अनुवादं कुरुत।**

१. नद्यः प्रायेण पर्वतेषु उत्पद्यन्ते। तासु कासांचित् समुद्रसङ्गमो भवति। ताः महानद्यः। आपगाः बहुधा जनान् उपकुर्वन्ति। एतासां सलिलैः सस्यानि वर्धन्ते। गङ्गा, यमुना, गोदावरी, तुङ्गभद्रा, कृष्णा, कावेरी, इत्येताः अस्मिन् भारतवर्षे प्रसिद्धाः पुण्यसरितः ।

२. पुरा कोसलेषु दशरथो नाम राजा आसीत् । तस्य चत्वारः पुत्राः आसन्। पितुरादेशेन रामः सीतया लक्ष्मणेन च साकम् अवसत् । तत्र रावणो नाम राक्षसेश्वरः सीतां अपहृतवान् । रामः लङ्कां गत्वा रावणं जघान।

३. दीपः वर्तिद्वारा तैलं गृह्णाति ज्वलति च । यदा तैलं शुष्यति तदा ज्वाला नश्यति। तैलदीपाः वायुना शाम्यन्ति। विद्युद्दीपाः न शाम्यन्ति। नगरेषु विद्युद्दीपाः प्रकाशन्ते।

४. शिरः कण्ठस्य उपरि वर्तते। शीर्षे प्रधानानि अङ्गानि वर्तन्ते। नेत्राभ्यां वयं पश्यामः। नासिकया वयं गन्धं जिघ्रामः। कर्णाभ्यां वयं गानं श्रुणुमः। जिह्वया वयं भाषामहे रसं च रसयामः। पादं हस्तं च विना जनाः जीवन्ति न तु शीर्षं विना।

५. प्रतिवर्षं वयं जन्मदिनोत्सवम् आचरामः। तस्मिन् दिने देवालयं गत्वा नमस्कृत्य प्रसादं स्वीकृत्य आगच्छामः। रक्तदानं कुर्मः। गृहे समारोहम् आयोज्य मधुरम् वितरामः। तद्दिने यत्किमपि अनुपमं कार्यं कुर्मः।

६. मानवाः पुण्यस्य फलम् इच्छन्ति। किन्तु पुण्यं न इच्छन्ति। पापस्य फलम् न इच्छन्ति। यत्नतः पापं कुर्वन्ति।

NOT TO BE REPUBLISHED © KTBS

* **संस्कृतभाषया अनुवादं कुरुत ।**

1. ಮೈಸೂರು ನಗರವು ಸಾಂಸ್ಕೃತಿಕ ನಗರವೆಂದು ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇಲ್ಲಿ ಪ್ರತಿವರ್ಷ ವಿಶ್ವವಿಖ್ಯಾತ ದಸರಾಮಹೋತ್ಸವವು ನಡೆಯುತ್ತದೆ. ಅದನ್ನು ನೋಡಲು ದೇಶ ವಿದೇಶಗಳಿಂದ ಜನರು ಬರುತ್ತಾರೆ. ಉತ್ಸವವನ್ನು ನೋಡಿ ಆನಂದವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ.

2. ಆ ಹುಡುಗಿಯರು ನಿನ್ನೆ ಪಾಠಗಳನ್ನು ಚೆನ್ನಾಗಿ ಓದಿದರು. ಇಂದು ಉತ್ತಮವಾಗಿ ಪರೀಕ್ಷೆಯನ್ನು ಬರೆಯುತ್ತಿದ್ದಾರೆ. ನಾಳೆ ಉತ್ತಮ ಫಲಿತಾಂಶವನ್ನು ನೋಡಿ ಸಂತುಷ್ಟರಾಗುವರು.

3. ಉದ್ಯೋಗವು ಮಾನವನ ಲಕ್ಷಣವು. ಉದ್ಯೋಗದಿಂದಲೇ ಎಲ್ಲಾ ಕೆಲಸಗಳು ಫಲಿಸುತ್ತವೆ. ನಾವೂ ಉದ್ಯೋಗಿಗಳಾಗೋಣ.

4. ಸ್ವಾಮಿ ವಿವೇಕಾನಂದರು ವಿಶ್ವದ ಮಹಾಪುರುಷರಲ್ಲಿ ಒಬ್ಬರು. ಅವರು ದೇಶವಿದೇಶಗಳಲ್ಲಿ ಸನಾತನಧರ್ಮದ ಪ್ರಚಾರವನ್ನು ಮಾಡಿದರು. ಅವರನ್ನು ನಾವು ಅನುಸರಿಸೋಣ.

5. ವಿದ್ಯಾರ್ಥಿ ಜೀವನವು ಅಮೂಲ್ಯವಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಯು ಸದಾ ಉತ್ಸಾಹದಿಂದ ಇರಬೇಕು. ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸಬೇಕು.

6. ಭಾರತೀಯ ಅಧ್ಯಾತ್ಮ ಪರಂಪರೆ ವಿಶಿಷ್ಟವಾಗಿದೆ. ಇಲ್ಲಿ ಮಹಾಪುರುಷರಾದ ಶಂಕರ, ರಾಮಾನುಜ, ಮಧ್ವ, ಬಸವೇಶ್ವರರು ಪ್ರಸಿದ್ಧರಾಗಿದ್ದಾರೆ. ಅವರು ಕ್ರಮವಾಗಿ ಅದ್ವೈತ – ವಿಶಿಷ್ಟಾದ್ವೈತ – ದ್ವೈತ ಶಕ್ತಿವಿಶಿಷ್ಟಾದ್ವೈತವನ್ನು ಪ್ರತಿಪಾದಿಸಿದರು.

7. ವಿದ್ಯಾಧರ ಚಕ್ರವರ್ತಿಯಾದ ಜೀಮೂತಕೇತುವಿನ ಪುತ್ರ ಜೀಮೂತವಾಹನ. ಅವನು ದಯಾಪರನಾಗಿದ್ದನು. ನಾಗಗಳನ್ನು ಗರುಡನಿಂದ ರಕ್ಷಿಸಲು ತನ್ನ ಜೀವವನ್ನೇ ಗರುಡನಿಗೆ ಸಮರ್ಪಿಸಿದನು. ಹೀಗೆ ಮಹಾತ್ಮರು ಪರೋಪಕಾರಕ್ಕಾಗಿಯೇ ಜೀವಿಸುತ್ತಾರೆ.

*****

© KTBS NOT TO BE REPUBLISHED

# ३. वाक्यरचनाकौशलम्



१. कृषिक्षेत्रम्

@KTBS NOT TO BE REPUBLISHED

शकटः, गृहम्, वृक्षाः, फलानि, नारिकेलम्, आम्रम्, कूपः, वृषभौ, धेनुः, कृषकाः, आरोपयन्ति, वहति, कर्षति, जलयन्त्रम्, पर्वतः, मेघः, जलम्, चक्रद्वयम्, शृङ्गे, उड्डयन्ति ।



२. चिकित्सालयः

वैद्यः, बालः, कूप्यः, व्यजनम्, उपनेत्रम्, घटीयन्त्रम्, मापनयन्त्रम्, नलिका, गुलिकाः, चित्रम्, उत्पीटिका, आसन्दः, तिरस्करिणी, परीक्षते, उपविशति, पुरतः, अस्ति, सन्ति, दृश्यते, पार्श्वे।

@KTBS NOT TO BE REPUBLISHED



३. उद्यानम्

©KTBS NOT TO BE REPUBLISHED

वृक्षः, आसनम्, पक्षिणौ, मेघाः, सस्यानि, वृद्धौ, कमलानि, पुष्पम्, दर्शयति, क्रीडतः, अवरुणद्धि, पर्वताः, व्यायामम्, मण्डपम्, सोपानानि, तटाकः, जलपातः, अस्ति, कोटरः, पत्रम्, सुन्दरम्, विशालम्, कुरुतः स्मरति ।



४. आपणव्यवहारः

NOT TO BE REPUBLISHED

बालिकाः, धनम्, आपणिकः, कदलीफलानि आम्रम्, अनानसम्, छत्रम्, चष्कुल्यः, लड्डुकम्, पुस्तकम्, दृश्यते, चित्रम्, स्यूतः, द्राक्षाफलम्, जलकूपी, शल्यम्, व्यजनम्, तरुः गृहम्, अस्ति, क्रीणाति, यच्छति, पश्यति, तिष्ठति, पुरतः, छात्राः, सन्ति, अल्पम्, अधिकम् ।

## ४. पदकोशः

| | | |
|---|---|---|
| अनिलः | ಗಾಳಿ | wind |
| अलीकम् | ಸುಳ್ಳು | false |
| अरिः | ಶತ್ರು | enemy |
| अर्कः | ಸೂರ್ಯ | sun |
| अम्बरम् | ಆಕಾಶ, ಬಟ್ಟೆ | sky, cloth |
| अभिभूतः | ಆವರಿಸಿದ | covered by |
| अस्थीनि | ಎಲುಬುಗಳು | bones |
| अमूल्यम् | ಬೆಲೆಬಾಳುವ | invalvable |
| अब्दः | ವರುಷ | year |
| अङ्गुष्ठः | ಹೆಬ್ಬೆರಳು | thum |
| अश्वारोहणम् | ಕುದುರೆ ಸವಾರಿ | horse ride |
| अभियोगाः | ಆಸಕ್ತಿಯುಳ್ಳವನು | interested |
| अपकोशं कृत्वा | ಹೊರ ತೆಗೆದು | taken out |
| आतिथ्यम् | ಉಪಚಾರ | hospitality |
| आयोजिता | ಏರ್ಪಡಿಸಿದೆ | arranged, organized |
| आत्मजः | ಮಗ | son |
| आर्जवम् | ಸರಳತೆ | strightness, simplicity |
| आशु | ಬೇಗನೆ | quickly, soon |
| आचन्द्रार्कम् | ಸೂರ್ಯಚಂದ್ರರಿರುವರೆಗೆ | as long as the sun & moon exist |
| इन्दुः | ಚಂದ್ರ | moon |
| उपाधिः | ಬಿರುದು | award, title |
| उपेत्य | ಸಮೀಪಿಸಿ | having approached |
| उद्यमः | ಪರಿಶ್ರಮ | effort |
| उदन्तः | ವೃತ್ತಾಂತ | news |

© KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| उपत्यका | ತಪ್ಪಲು | land at the foot of a hill |
| उरगः | ಸರ್ಪ | snake |
| उपशमनम् | ಗುಣಪಡಿಸುವಿಕೆ | caloming, mitigation |
| उप्तम् | ಬಿತ್ತಲ್ಪಟ್ಟ | sown |
| औदार्यम् | ಉದಾರತೆ | generosity |
| कूपः | ಬಾವಿ | a well |
| क्रूरः | ಕ್ರೂರ | cruel |
| कुबुद्धिः | ಕೆಟ್ಟಬುದ್ಧಿ | evil mind |
| कनकम् | ಚಿನ್ನ | gold |
| काण्डः | ದಂಟು | a part, stem of a tree |
| कृष्टीः | ಆಕರ್ಷಣೀಯ | attractive |
| कन्दः | ಗಡ್ಡೆ | A BLUBOUS ROOT |
| खम् | ಆಕಾಶ | sky |
| गवेषणम् | ಹುಡುಕುವುದು | search |
| घनः | ಮೋಡ | a cloud |
| चन्द्रिका | ಬೆಳದಿಂಗಳು | moonlight |
| झञ्झावातः | ಬಿರುಗಾಳಿ | storm |
| जरा | ಮುಪ್ಪು | oldage |
| तमसि | ಕತ್ತಲಲ್ಲಿ | in darkness |
| त्यागः | ದಾನ | giving away in charity, giving up |
| तुमुलम् | ಘೋರವಾದ | fierce |
| त्रस्तः | ಹೆದರಿದ | frightended, terrified |
| द्विपः | ಆನೆ | an elephant |
| द्याम् | ಆಕಾಶವನ್ನು | sky |

NOT TO BE REPUBLISHED @KTBS

| | | |
|---|---|---|
| दर्भः | ದರ್ಭೆಹುಲ್ಲು | kusha grass (a kind of sacred grass) |
| निजः | ತನ್ನವನು | one's own |
| निशीथिः | ರಾತ್ರಿ | night |
| निदाघः | ಬೇಸಿಗೆ | summer |
| निर्बन्धः | ಒತ್ತಾಯ | persistence |
| निर्धनः | ಬಡವ | a poor man |
| निमील्य | ಕಣ್ಣು ಮುಚ್ಚಿ | shutting the eyes |
| निदानम् | ಕಾರಣ | primary cause |
| निर्वेदः | ವೈರಾಗ್ಯಜ | isgust, despair |
| पाषाणः | ಕಲ್ಲುಚಿ | stone |
| पाकशासनः | ಇಂದ್ರ | lord indra |
| प्रथा | ಪ್ರಸಿದ್ಧಿ | fame |
| पौरः | ನಾಗರಿಕರು | citizens, subjects |
| प्रभृतिः | ಮೊದಲಾದ | etc. |
| पुरुषकारः | ಮನುಷ್ಯಪ್ರಯತ್ನ | human effort |
| भित्तिः | ಗೋಡೆ | a wall |
| भूतपतिः | ಶಿವ | lord shiva |
| भुजङ्गः | ಸರ್ಪ | a seprent |
| भृशम् | ಬಹಳ | very much |
| मार्दवम् | ಮೃದುವಾದ | softness |
| यवीयान् | ಕಿರಿಯ | younger |
| यवनः | ಮುಸಲ್ಮಾನ | a muslim |
| रसना | ನಾಲಗೆ | tongue |
| वाहिनी | ಸೇನೆ | army |
| विपत् | ಕಷ್ಟ | misery, disaster |

NOT TO BE REPUBLISHED @KTBS

| | | |
|---|---|---|
| विभूतिः | ಸಂಪತ್ತು | prosperity |
| व्यवसायः | ಕೆಲಸ | an act |
| व्याजः | ಕಪಟ ನೆಪ | cunning |
| वासवः | ದೇವೇಂದ್ರ | lord Indra |
| शालिः | ಬತ್ತ | paddy |
| शैलाः | ಪರ್ವತಗಳು | mountains |
| शनैः | ಮೆಲ್ಲಗೆ | slowly |
| सहसा | ಅವಿಚಾರಿತ | all of a sudden |
| सुपर्वाणः | ದೇವರು | god |
| सौधः | ಅರಮನೆ | mansion |
| सुचारुवादः | ಆಸಕ್ತಿದಾಯಕ ವಿಚಾರ | very pleasing talk |
| सन्देशपत्रम् | ಸೂಚನಾಪತ್ರ | a letter containing some message |
| स्तम्भः | ಕಂಬ | pillar |
| स्वस्ति | ಒಳ್ಳೆಯದು | 'may it be well' |
| हनुः | ಕೆನ್ನೆ | cheek |
| हिमप्रस्तरः | ನೀರ್ಗಲ್ಲು | an icy rock |
| क्षुत् | ಹಸಿವು | hunger |
| क्षेत्रम् | ಹೊಲ | a field |
| क्षान्तः | ಸಂತೈಸಿಕೊಂಡ | forgiven, enduring |
| क्ष्माभृत् | ಪರ್ವತ | a mountain |
| क्षितिपालः | ಅರಸ | a king |

*****

NOT TO BE REPUBLISHED
©KTBS

## प्रश्नपत्रिका स्वरूपम्-X

अङ्काः 100

### भागः-अ (गद्यम्, पद्यम्, पूरकपाठः)

| | |
|---|---|
| ✻ एकवाक्येन उत्तरं लिखत । | 11×1=11 |
| ✻ चतुर्थं पदं लिखत । | 4×1=4 |
| ✻ लघूत्तराणि लिखत । | 4×2=8 |
| ✻ श्लोकयोः तात्पर्यं संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा लिखत। | 2×2=4 |
| ✻ कवेः देश-काल-ग्रन्थानां विषये लिखत । | 2×3=6 |
| ✻ निर्देशानुसारम् उत्तरं लिखत। | 3×3=9 |
| ✻ दशवाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत। | 3×4=12 |
| ✻ पद्यं पूरयत । | 1×4=4 |
| ✻ परिच्छेदं पठित्वा प्रश्नान् उत्तरत। | 4×1=4 |

### भागः- आ (व्याकरणविभागः)

| | |
|---|---|
| ✻ समुचितम् उत्तरं क्रमाक्षरेण सह चित्वा लिखत। | 10×1=10 |
| ✻ प्रयोपरिवर्तनं कुरुत । | 1×2=2 |
| ✻ रेखाङ्कितं पदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत। | 1×2=2 |
| ✻ वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत । | 1×2=2 |
| ✻ वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत। | 1×3=3 |
| ✻ प्रस्तारं विलिख्य, गणविभागं कृत्वा छन्दो नाम लिखत। | 1×3=3 |

### भागः - इ (रचनात्मकविभागः)

| | |
|---|---|
| ✻ संस्कृतभाषया अनुवादं कुरुत । | 1×3=3 |
| ✻ आङ्ग्लभाषया, कर्णाटकभाषया वा अनुवादं कुरुत। | 1×3=3 |
| ✻ पत्रं लिखत । | 1×5=5 |
| ✻ प्रबन्धं लिखत । | 1×5=5 |

NOT TO BE REPUBLISHED @KTBS

# मार्गदर्शिप्रश्नपत्रिका
## X Std. I Language Sanskrit
## प्रथमभाषा - संस्कृतम् - (16S)

Max. Marks-100

## भागः - अ (गद्यम्-पद्यम्-पूरकपाठः)

**एकवाक्येन उत्तरं लिखत।** 11×1=11

1. चतुर्विधपुरुषार्थाः के ?
2. ध्रुवः कं साक्षात्कर्तुम् अरण्यं जगाम?
3. कः भूमिं परितः प्रदक्षिणं करोति ?
4. भारतीयभावना निरन्तरं किं ददाति ?
5. "राधेयः' इति विश्रुतः कः?
6. अञ्जना कीदृशं सुतं प्रासूत ?
7. धृतराष्ट्रस्य सुतः कः ?
8. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत्?
9. लोकः केन ग्रथितः?
10. नाट्यशास्त्रस्य रचयिता कः ?
11. चम्पूविषये प्रसिद्धा अभियुक्तिः का ?

**चतुर्थपदम् लिखत।** 4×1=4

12. वृत्रासुरः : राक्षसः :: दधीचिः :.................।
13. प्राणायामेन युक्तेनः योगेन : सर्वरोगक्षयः :: अयुक्ताभ्यासयोगेनः.................।
14. सिन्धुलस्य पुत्रः : भोजः :: सिन्धुलस्य अनुजः : .................।
15. गणपति : मुनिः :: रमण : .................।

NOT TO BE REPUBLISHED ©KTBS

**लघूत्तराणि लिखत ।** 4×2=8

16. अस्थियाचकम् इन्द्रं दधीचिः सानन्दं किम् अवदत्?

17. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

18. संस्कृतभाषाविषये डा।। सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

19. प्रजाभिप्रायं स्वीकृत्य चन्नम्मा राजारामं किम् अब्रवीत् ?

**श्लोकयोः तात्पर्यं संस्कृतभाषया आङ्ग्लभाषया कर्नाटकभाषया वा लिखत ।**

2×2=4

20. ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः।।

21. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।

**कव्योः देश-काल-कृतीनां विषये लिखत।** 2×3=6

22. डा।। के. एस्. नागराजन्

23. भोजराजः

**यथानिर्देशम् उत्तरं लिखत।** 3×3=9

24. शरणागतरक्षणं धर्मः, इति अस्माकं श्रद्धा ।
कः पाठः ? का अवदत्? शरणागतः कः?

25. रसे गन्धे न रज्यते।
कः पाठः ? कः अवदत्? कः न रज्यते ?

26. भगवन् किमिच्छसि ? किमहं ददानि ?
कः पाठः ? कः अवदत्? कम् अवदत्?

©KTBS NOT TO BE REPUBLISHED

**दशभिः वाक्यैः उत्तरं संस्कृतभाषया कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।** 3×4=12

27. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

28. पाठ्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

29. अमरनाथगुहाविषये का पुराणकथा अस्ति ?

**पद्यं पूरयत।** 1×4=4

30. मनीषिणः ...................................... दुर्लभम्।।

31. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत। 4×1=4

सर्वेभ्यः जलं ददामि अहम्। अतः जनाः मां मेघः, जलदः, वारिदः, पयोदः इति नामभिः अपि जानन्ति। सागरः मम जन्मस्थानं, गगनं मम गृहं, धरा मम गन्तव्यम् अस्ति । विद्युत् मां प्रकाशयति। पवनः स्वाङ्के लालयति ये बाला मां दृष्ट्वा हृष्यन्ति ये जनाः प्रसीदन्ति । कृषकाः मोदन्ते । मयूराः नृत्यन्ति च धरायाः पिपासा मया एव शाम्यते । अहम् एव सर्वप्राणिनां जीवनम् अस्मि।

प्रश्नाः -

1. कः मेघं लालयति ?
2. के नृत्यन्ति ?
3. मेघः कस्याः पिपासां शाम्यति ?
4. अस्मिन् अनुच्छेदे वक्ता कः ?

## भागः-B (व्याकरणविभागः)

**समुचितम् उत्तरं चित्वा क्रमाक्षरेण सह निर्दिष्टस्थाने लिखत।** 10×1=10

32. भुञ्जीथाः - अत्र एषः लकारः वर्तते

a. लट् b. लिट् c. लोट् d. विधिलिङ्

© KTBS NOT TO BE REPUBLISHED

33. 'मार्गान्तरम्' अस्य विग्रहवाक्यम् इदं भवति।

a. अन्यः मार्गः b. मार्गः अन्तरम् c. अन्यत् मार्गम् d. मार्गे अन्तरम्

34. 'ओजः' - अस्य समानार्थकपदम् इदं भवति।

a. शान्तिः b. कान्तिः c. क्रान्तिः d. भ्रान्तिः

35. अत्र समूहेतरपदम् इदं भवति।

a. मुनिर्नमति b. देवैरपि c. बालस्तत्र d. धेनुर्धावति

36. 'भार्या' - अस्य अन्यलिङ्गरूपम् इदं भवति।

a. जाया b. स्वसा c. भर्ता d. भ्राता

37. पतितफलः - अत्र एषः समासः वर्तते।

a. द्वन्द्वसमासः b. बहुव्रीहि समासः c. तत्पुरुषसमासः d. अव्ययीभावसमासः

38. 'महर्षे': - अत्र एषा विभक्तिः वर्तते ।

a. सप्तमी b. तृतीया c. षष्ठी d. प्रथमा

39. एषु शुद्धं वाक्यम् इदं भवति।

a. नृपः शत्रुम् ईर्ष्यति। b. नृपः शत्रोः ईर्ष्यति।

c. नृपः शत्रौ ईर्ष्यति। d. नृपः शत्रवे ईर्ष्यति।

40. 'शुक्ल': - अस्य विरुद्धार्थकपदम् इदं भवति।

a. धवलः b. गौरः c. कृष्णः d. सितः

41. सूर्यदिव - अत्र एषः सन्धि वर्तते।

a. श्चुत्वसन्धिः b. जश्त्वसन्धिः c. अनुनासिकसन्धिः d. सवर्णदीर्घसन्धिः

42. **प्रयोगपरिवर्तनं कुरुत।** 1×2=2

a. रामः मां पश्यति। b. अध्यापकेन प्रश्नः पृष्टः ।

43. **रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत।** 1×2=2

a. त्वं त्यक्तेन भुञ्जीथाः। b. चन्द्रस्य शुक्लपक्षे वृद्धिः सम्भवति।

© KTBS NOT TO BE REPUBLISHED

44. **वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।** 1×2=2

a. पुष्पेण विकसितव्यम्। b. छात्रः शालां गत्वा पठति।

45. **वाक्ये विद्यमानम् अलङ्कारं सलक्षणं विवृणुत।** 1×3=3

a. माघे मेघे गतं वयः।

46. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत।** 1×3=3

a. पिबन्ति नद्यः स्वयमेव नाम्भः।

*****

## भाग- C

## (रचना विभागः)

**संस्कृतभाषया अनुवादं कुरुत।** 1×3=3

47. ವಿದ್ಯಾರ್ಥಿ ಜೀವನವು ಅಮೂಲ್ಯವಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಯು ಸದಾ ಉತ್ಸಾಹದಿಂದ ಇರಬೇಕು. ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸಬೇಕು.

48. **कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** 1×3=3

a. आधुनिकयुगे अर्थस्यैव अतीव महत्त्वम् स्थानं वर्तते। अर्थो हि सर्वकार्यस्य प्रधानतमं साधनम्। अर्थो हि सर्वस्य दुःखस्य सुखस्य च कारणम्। अतः मानवा अर्थविषये जागरूकः भवेत्।

49. **शालावर्षिकोत्सवस्य वर्णनं कृत्वा मित्रं प्रति पत्रं लिखत ।** 1×5=5

**अथवा**

भवतः ग्रमोत्सवे भागं गृहीतुं दिनचतुष्टयं विरामं प्राथ्र्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

50. **प्रबन्धं लिखत ।** 1×5=5

परिसरः **अथवा** दूरदर्शनम्

*****

NOT TO BE REPUBLISHED ©KTBS

# पाठयोजना

| मासाः | पाठाः |
|---|---|
| अक्टोबर् | सुभाषितानि ५ - ८, प्रयोगः |
| नवेम्बर् | विवेकोदयः,भारतीयभावना, पत्रलेखनम्-३, ४, नगधिराजः छन्दः ३ - ४ |
| डिसेम्बर् | नाट्यांशावः, कर्णभारम्, अलङ्कारः-३, ४ अनुवादः-३, ४ भागवान् रमाणमहर्षिः |
| जनवरी | मन्थरानिर्ममन्थ, भीष्मोक्तयः, ३,४, प्रबन्धाः-३,४ |
| फेब्रवरी | परिशिष्टम्, वाक्यरचनाकौशलम् - ५, ६, अपठितगद्यभागः - ३, ६ अनुवादः - ३, ४ |
| मार्च् | पुनरावर्तनम् |

## SANSKRIT RESOURCES ON THE WEB

**Literature Search**

Wikipedia (en.wikipedia.org), Wiki in Sanskrit (sa.wikipedia.org), Sanskrit Wikisource (sa.wikisource.org), Sanskrit Wikibooks (sa.wikibooks.org)

**Data Collection - Texts**

htfp://sanskritdocuments.org ; http://www.sanskrit.nic.in/ebook.htm

**Reference Material : Dictionaries - Online**

Monier Williams Sanskrit-English Dictionary- http://www.sanskrit-lexicon.uni-koeln.de/monier/

*****

© KTBS NOT TO BE REPUBLISHED